512

अष्टावक्र टीका

	Ashtāvakra Tīkā	Title
	Vishweshwara	Author
		Editor
	Sam. 1770	Year, Vols.
		Publisher
512		Remarks

कथं ज्ञानमवाप्नोति कथं मुक्तिर्भविष्यति। वैराग्यं च कथं प्राप्तमेतद्ब्रूहि मम प्रभो॥१॥ अ०टी०

श्रीगणेशाय नमः॥ श्रीसच्चिदानंदात्मने गुरवे नमः॥ सच्चिदानंदमद्वैतं सर्वाधिष्ठानमुत्तमं॥ नत्वाष्टा
१ वक्रसूक्तस्य दीपिका तन्यते परा॥१॥ श्रीमद्गोपालचैतन्येन रचितेन मया दीपिकाटीका विस्तार्यं क्री
यते॥ सकलविद्वज्जनकृपाकटाक्षसंतुष्टचेतसा मया विस्तार्यटीका क्रीयते॥ इत्याहार इह खलु
ज्ञानविज्ञानसंपन्नः परमकारुणिको ऽष्टावक्रमुनिः मुक्तिकामनया समुपेतं कंचिच्छिष्यं शमदमाद्यधि
कारस्वीकारोपदेशपूर्वकमात्मतत्वमुपादिशति॥ छ॥ मुक्तिमिछसि चेत्तात विषयान्विषवत्त्यज॥ क्षमा
र्जवदयातोषसत्यं पीयूषवद्भज॥१॥ तात तेन सानुग्रहसंबोधनेन हे शिष्य चेत्त्वं मुक्तिं सर्वानर्थनिवृत्तिपर
मानंदावाप्तिरूपां मुक्तिमिछसि चेत्तर्हि विषयान्विषवत्त्यज॥ यथा विषं अनर्थहेतुत्वात्त्यज्यते तथा विष
यान्देहादीननर्थहेतुभूतांस्त्यज॥ तत्राहं ममेत्यध्यासासक्तिमाकार्षीरित्यर्थः। अनेन वाह्यपदार्थानुषं
गत्यागो यं दमो वाह्येंद्रियसंयमः शमो ऽतःकरणसंयमः। पाठांतरानुषंगत्यागोपदेशेन वाह्येंद्रियनिग्रहरूपद १
मांगीकार उपदिष्टः॥ अथांतःकरणनिग्रहरूपशमाधिकारमुपदिशति॥ क्षमेति। क्षमादिकं यथा पीयू

षं अर्थहेतुत्वात्सेव्यते तथा सेव्यमित्यर्थः॥ शमदमादिसाधनचतुष्टयसंपन्नमधिकारिणं शिष्यं प्रति भगवा
नष्टावक्रो मुनिर्मुक्तिमुपदिशति॥ छ॥ ननु पांचभौतिको देह एवात्मा तथा च भूतानां तद्धर्माणां च त्यागो न
संभावितः। नहि पृथिव्यादिना स्वभावभूतो गंधादिकात्त्यज्यत इत्याशंक्य पृथिव्यादिरूपस्त्वं न भवसी
त्याह॥ छ॥ न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान्॥ एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये॥२॥
हे शिष्य पृथिव्यप्तेजोवाय्वाकाशतद्धर्मरूपस्त्वं न भवसि ततस्त्वं अनात्मधर्मान्विषयांस्त्यजेत्यर्थः॥ नन्वहं
गौरः स्थूलः कृशः ह्रस्व इत्यादिप्रतीतेः पांचभौतिको देह एवात्मेत्यत आह। एषामिति। एषां देहादीनां साक्षिण
मेवात्मानं विद्धि साक्षात्कुरु॥ तथा च देहादेः साक्षी आत्मा देहादिभ्यो भिन्नः। यथा घटद्रष्टा घटाद्भिन्न इत्य
र्थः। नैयायिकाभिमतमात्मानं निराकरोति। चिद्रूपमिति॥ आत्मज्ञानस्य फलमाह मुक्तये इति॥२॥ आ
त्यंतिकी दुःखनिवृत्तिर्मुक्तिरिति नैयायिकाः। दुःखप्रागभावपरिपालनं मुक्तिरिति प्राभाकराः। आत्महानिर्मु
क्तिरिति बौद्धाः॥ इत्यादिमतानि निराकुर्वन्नेवात्मज्ञानाज्जीवन्मुक्तिदशामाह॥ छ॥ यदि देहं पृथक्कृ

कृत्य चितिविश्राम्य तिष्ठसि॥ अधुनैव सुखी शांतो बंधमुक्तो भविष्यसि॥४॥ हे शिष्य यदि त्वं देहं पृथक्कृत्य देहाद्
२ भिन्नो विलक्षणं विचार्य चिति विश्राम्य चिदेकाग्रीभूत्वा तिष्ठसि तर्हि त्वं अधुनैव इदानीं जीवन्मुक्तदशायामेव
सुखी प्राप्तपरमानंद अतएव शांतः सुप्रसन्नमनाः बंधमुक्तः कर्तृत्वभोक्तृत्वप्रमुखानर्थरहितो भविष्यसी
त्यर्थः॥४॥ ननु वर्णाश्रमप्रयुक्तानि कर्माणि विहाय चितिविश्रामावस्थानं कथं मुक्तिरित्याशंक्यात्मनो व
र्णाश्रमविलक्षणत्वमाह॥ न त्वं विप्रादिको वर्णो नाश्रमी नाक्षगोचरः। असंगोऽसि निराकारो विश्वसा
क्षी सुखी भव॥५॥ त्वं वर्णाश्रमविलक्षण इत्यर्थः। नन्वहं ब्राह्मणः इत्यादिवाक्यानुपपत्तिरूपत्वादात्मैव वर्णा
श्रमीत्याशंक्याह। नाक्षगोचर इति। अयं ब्राह्मणः इत्यादिप्रत्ययास्तु देहगोचरा एव न त्वात्मगोचरास्तस्मादिं
द्रियकज्ञानागोचरत्वादित्यर्थः। तर्हि कीदृशोऽहमित्याशंक्यात्मानं निरूपयन्नेव तद्विश्रांतिफलमनुवदति
असंग इति। असंगः सर्वोपाधिसंगरहितः। निराकारः विश्वसाक्षी त्वमसि। अतस्त्वमसंगादिरूपस्य तव २
वर्णाश्रमविलक्षणत्वात्कर्मासक्तिं परिविहाय चितिविश्राम्य सुखी प्राप्तपरमानंदो भवेत्यर्थः॥५॥

ननु वेदोदितं कर्म विहाय चितिविश्रांतावपि प्रत्यवायप्रसंग इत्यत आह॥ धर्माधर्मौ सुखं दुःखं मानसानि
न ते विभो॥ न कर्तासि न भोक्तासि मुक्त एवासि सर्वदा॥६॥ हे विभो पूर्ण धर्माधर्मादयो मनोधर्मा एव
कालत्रयेऽपि तैः सह तव संबंधो नास्तीत्यर्थः। न कर्तेति। किंच विहितनिषिद्धकर्मकर्तुः धर्माधर्माद्वा
रा सुखदुःखभोक्तृत्वं तदपि तव नास्ति शुद्धबुद्धस्वरूपत्वात्त्वं सर्वदा मुक्त एव अज्ञानमात्रविजृंभिते बं
मो०टी० धसुखदुःखे ते तु चितिविश्रांत्यैवाज्ञाननिवृत्त्या न विजृंभिष्येते इत्यर्थः॥६॥ ननु शुद्धबुद्धस्वभावस्यैक
स्यानंतमुक्तस्यात्मनो बंधः किंनिबंधनो यस्य निबंधस्य निवृत्त्यर्थो विवेकी नोयतंत इत्याशंक्य नित्य
मुक्तस्यापि प्रातीतिकं बंधहेतुमाह॥ एको द्रष्टासि सर्वस्य मुक्तप्रायोऽसि सर्वदा॥ अयमेव हि ते बंधो
द्रष्टारं पश्यसीतरं॥७॥ हे शिष्य सर्वस्य द्रष्टा प्रतिशरीरमेकस्त्वमसि। तत्र व्यापकत्वात्सर्वदा मुक्तप्रा
योऽसि। देहाध्यासवशतो बंधप्रतीयमानेऽपि वस्तुगत्या मुक्तोऽसीत्यर्थः। अयमिति। हि निश्चितं अयमेव
ते तव बंधो यदितरं देहादिरूपं परिच्छिन्नं द्रष्टारं पश्यसीत्यर्थः॥७॥ पूर्वं बंधहेतुरुक्तः अथानर्थ

हेतुं वदन्नेवतन्निवृत्तिपरमानंदावाप्तिउपायमनुवदति।।छ।। अहंकर्तेत्यहंमानमहाकृष्णाहि
३ दंशितः।। नाहंकर्तेति विश्वासामृतं पीत्वा सुखी भव।।८।। हे शिष्य अहंकर्तेत्येवं रूपो योऽहंमानः अहं
इत्यात्मनि कर्तृत्वाभिमानस्तद्रूपो महान् कृष्णसर्पः सुखदुःखविषावहस्तेन दंशितः। कवलीकृतोऽतः कृ
रणात् नकर्ताहं अकर्ता आत्मा इत्येवं रूपं विश्वासामृतं निश्चयामृतं पीत्वानुभूय सुखी भव प्राप्तपरमा
नंदो भवेत्यर्थः।।८।। नन्वात्मज्ञानामृतपानं किंद्वारा सुखसाधनमित्याशंक्याज्ञानकाननदहनद्वारा ज्ञा
नाग्निः सुखसाधनमित्याह।।छ।। एको विशुद्धबोधोऽहमिति निश्चयवह्निना।। प्रज्वाल्याज्ञानगहनं वीत
शोकः सुखी भव।।९।। एकः सजातीयविजातीयस्वगतभेदरहितः विशुद्धबोधः स्वप्रकाशः चिदात्माहमि
तिनिश्चयाग्निना अज्ञानाख्यं गहनं प्रज्वाल्य प्रकर्षेण दग्ध्वा मोहरागद्वेषप्रवृत्तिजन्मापायाद्वीतशोको
विगतदुःखः सन्सुखी भवेत्यर्थः।।९।। नन्वात्मज्ञानेन अज्ञाने दाहे सत्यपि सत्यस्य प्रपंचस्य ज्ञानादनि ३
वृत्तेर्वीतशोकः कथं स्यादित्याशंक्य प्रपंचस्य रज्जुभुजंगतुल्यत्वाज्ज्ञानाद्विनिवृत्तेर्दुःखहेतोरभावाद्वी

तशोकता स्यादित्याह।।छ।। यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत्। आनंदपरमानंदः स बोधस्त्वं सुखं चर।
१०।। यत्र बोधे इदं विश्वं रज्जुसर्पवत् कल्पितं अधिष्ठानाज्ञानकल्पितं भाति स बोधश्चिदात्मा त्वं सुखं चर। यथा
स्वप्नदशायामज्ञानकल्पितं व्यापारादिकं पश्यति। जाग्रद्बोधेन निवर्त्य सुखं चरति तद्वदित्यर्थः। ननु दुःखहेतु
प्रपंचानिवृत्तौ दुःखाभावमात्रं स्यात् सुखं तु कथं स्यादित्याशंक्य स्वभावत एव त्वं नित्यानंतानंदस्वरूप इत्याह
आनंद इति। आनंदेभ्यो मनुष्येभ्यो लोकदेवलोकानंदेभ्यः परम उत्कृष्ट आनंदस्त्वं इत्यर्थः।।१०।। एकस्यैवानं
दस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः।। ननु सर्वं रज्जुसर्पवत्कल्पितं स्वभावेन स्वानंद एवात्मेति
चेत्तर्हि बंधमोक्षौ वात्मनः किं च निबंधनावित्याशंक्याह।।छ।। मुक्ताभिमानी मुक्तो हि बद्धो बद्धाभिमान्य
पि। किंवदंतीह सत्येयं या मतिः सा गतिर्भवेत्।।११।। हि निश्चितं मुक्ताभिमान्येव मुक्तः अपि च बद्धाभिमानी
बद्धः अत्र किं त्वीत प्रमाणयति किंवदंतीति या मतिः सा गतिर्भवेदयं हि प्रसिद्धा किंवदंती विद्वज्जनः। श्रु
तिः सत्या अबाधिता यां तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति श्रुतिरपि गृहीतत्वात्। यं यं वापि

६ स्मरन्भावं इत्यादिस्मृतिपरिगृहीतत्वाच्च।तथा चाभिमानिकावेवबंधमोक्षौ न तु वास्तवावित्यर्थः।पूर्वं
मुक्तोप्ययमर्थो दुर्बोधत्वात्पुनः पुनः शिष्यबोधार्थमुक्तमिति न दोषः।११।ननु जीवात्मनः पारमार्थिका
वेवबंधमोक्षावितिनास्तिकाशंकामपाकर्तुमाह॥छ॥आत्मा साक्षी विभुः पूर्ण एको मुक्तश्चिदक्रियः॥
असंगो निःस्पृहः शांतो भ्रमात्संसारवानिव॥१२॥आत्मा भ्रमाद्देहादावात्मतादात्म्या भ्रमात्संसारवानिव
प्रतीयते न तु वस्तुतः संसारी अत्र दश हेतूनाह साक्षीति।कर्तुरहंकारादेः साक्षी न तु कर्ता।विभुः विवि
धं भवत्यस्मादिति विभुः सर्वाधिष्ठानं।पूर्णः व्यापकः।एकः सजातीयविजातीयस्वगतभेदरहितः।मुक्तः व
स्तुगत्या मायातत्कार्यातीतः।चित्स्वप्रकाशचैतन्यरूपः।अक्रियश्चेष्टारहितः।असंगः सर्वसंबंधशून्यः।
असंगो ह्ययं पुरुष इति श्रुतेः।निःस्पृहः विषयाभिलाषरहितः।शांतः प्रवृत्तिनिवृत्तिदेहाद्यंतःकरणध
र्मरहितः तस्माद्वस्तुतो न संसारीत्यर्थः॥१२॥अहं परिच्छिन्नो ममेदं देहादिकं सुखी दुःखी चाहमिति भ्रम ६
स्यानादिपरंपरागतस्य सकृद्भावनया निवर्तयितुमशक्यत्वादावृत्तिरसकृदुपदेशादिति व्याससूत्राच्च पुनः पु

नर्देहात्मभावनाविजातीयभावनानिवृत्तिपुरःसरामुपदिशति॥छ॥कूटस्थं बोधमद्वैतमात्मानं परिभाव
य॥ आभासोहं भ्रमं मुक्त्वा भावं बाह्यमथांतरं॥१३॥हे शिष्य आभासोहं अहंकारोहमिति भ्रमं मुक्त्वा बा
ह्यं भावं ममेदं देहादिकमिति बाह्यपदार्थविषयं भावं भावनां मुक्त्वा अथ चांतरं भावं सुखी दुःखी मू
ढोहमिति आंतरपदार्थविषयं भावं भावनां मुक्त्वा।अकर्त्ताकूटस्थमसंगबोधस्वरूपमद्वैतमात्मा
नं परिसमंताद्व्यापकं भावयेत्यर्थः॥१३॥अनादरयं देहाभिमानमसकृद्भावनया न निवर्त्तत इति पुनः
पुनर्ज्ञानखड्गेन तं निकृत्य सुखी भवेत्याह॥छ॥देहाभिमानपाशेन चिरं बद्धोसि पुत्रक॥ बोधोहं ज्ञा
नखड्गेन तन्निकृत्य सुखी भव॥१४॥हे पुत्रक हे शिष्य त्वं देहोहमिति अभिमानपाशेन चिरं बद्ध
कल्पं बद्धोसि।अतो बोधोहं चिद्रूपोहमिति ज्ञानखड्गेन पुनः पुनस्तं पाशं निकृत्य नितरां
छित्वा सुखी भव॥१४॥चित्तवृत्तिनिरोधरूपः समाधिरेव केवलो बंधनिवृत्तिहेतुरिति पातंज
लमतमपाकर्तुमाह॥छ॥निःसंगो निःक्रियोसि त्वं स्वप्रकाशो निरंजनः।अयमेव हि ते बंधः समा

५ धिमनुतिष्ठसि॥१४॥ हेशिष्य त्वं वस्तुतो निःसंगः सर्वसंबंधशून्योसि। तथा क्रियारहितोसि अत्र हेतुमाह
स्वप्रकाशो निरंजन इति निःक्रियस्य समाध्यनुष्ठानं यत् अयमेव हि निश्चितं बंधः। तथा चाज्ञानातिरिक्तो
पायानुष्ठानमात्रं प्रसुतबंधनमेवेत्यर्थः॥१५॥ तदेवमात्माज्ञानातिरिक्तः समाधिरपि पूर्वं निराकृतः अथपरि
पूर्णशुद्धबुद्धात्मनि विपरीतधियमुत्सारयन्नेव चित्तनिष्ठामुपसंहरति श्लोकद्वयेन॥ छ॥ त्वयेति। त्वया
व्याप्तमिदं विश्वं त्वयि प्रोतं यथार्थतः॥ शुद्धबुद्धस्वरूपस्त्वं मागमः क्षुद्रचित्ततां॥१५॥ हेशिष्य इदं विश्वं त्वया
व्याप्तं कनकेनेव कटककुंडलादिकं यथा। तथा इदं विश्वं त्वयि प्रोतं मृदीव घटशरावादिकं। हेशिष्य त्वं
यथार्थतः परमार्थतः शुद्धः। अविद्यातत्कार्यप्रपंचातीतः। बुद्धः स्वप्रकाशः चिद्रूपोसि। एवं च सर्वगंधः
सर्वरसो नेति श्रुतिद्वयानुसारेणोक्ताभ्याम आरोपापवादाभ्यां निःप्रपंचमात्मतत्वमुपदिष्टं भवतीति।
हेशिष्य परिपूर्णशुद्धबुद्धस्वरूपस्त्वं क्षुद्रचित्ततां विपरीतचित्तवृत्तिं मागमः मा काषीरित्यर्थः॥१५॥ प्र ५
तीयमानाः षडूर्मयः षड्भावविकारा न त्वद्गतास्त्वं तु तद्विलक्षण इत्यर्थः॥ छ॥ निरपेक्षो निर्विकारो नि

र्भरः शीतलाशयः॥ अगाधबुद्धिरक्षुब्धो भव चिन्मात्रवासनः॥१६॥ हेशिष्य त्वं निरपेक्षः। अशनापिपासादि
षडूर्मीसंसर्गातीतः। तथा निर्विकारः। जायते। अस्ति। वर्द्धते। विपरिणमते। अपक्षीयते। विनश्यतीत्येवं वि
धा यास्कादिप्रोक्ताः षड्भावविकारास्तत्संसर्गरहितस्त्वमित्यर्थः। तर्हि कीदृशोहमिति अत आह। निर्भरइ
ति। निर्भरः चिद्घनरूपः। शीतलः सुखस्वरूपः। आमुक्तिसमयमभिव्याप्य शेते तिष्ठतीत्याशयः। अगाधा
अतलस्पर्शा अपरिछिन्ना बुद्धिः स्वरूपचैतन्यं तद्रूपः। अक्षुब्धः। अविद्याकृतक्षोभरहितः। त्वं वस्तुतोपि
अतस्त्वं क्रियामात्ररहितचिन्मात्रनिष्ठो भवेत्यर्थः॥१६॥ प्रकरणं समाप्तं॥ ॥ छ॥ ॥ विषयान्विषवत्त्य
ज सत्यं पीयूषवद्भजेति मोक्षोपायः प्रथमश्लोके समुपदिष्टः। परं तु विषयाणां विषतुल्यत्वे सत्यात्मनः पीयूष
तुल्यत्वे च हेतुर्नोक्तः तस्मात्तद्धेतुं वदन्नेव षोडशश्लोकोपदेशो मोक्षहेतुश्चिदात्मा च स्वाध्यस्तं विश्व
समंततो व्याप्यावस्थितो मुकुर आदर्श इव स्वाध्यस्तं शरीरं इति तज्ज्ञावाप्तिरेव परमपुरुषार्थ इत्युपपत्ति
मुखेन प्रकरणार्थं संगृह्णाति श्लोकत्रयेण॥ अथ संग्रहश्लोका इत्यादिना॥ छ॥ साकारमनृतं विद्धि निरा

६ कारं तु निश्चलं ॥ एतत्तत्त्वोपदेशेन न पुनर्भवसंभवः ॥१७॥ अथ हे शिष्य साकारं शरीरादिकं अनृतं मि
थ्याभूतं विद्धि अतस्तद्विषवत्त्यजेत्यर्थः ॥ निराकारं आत्मा तत्त्वं निश्चलं कालत्रयावस्थापितं विद्धि सर्व
साक्षीत्वान्नित्यं विज्ञानमानंदं ब्रह्मेति श्रुतेश्च अत एतत्तत्त्वेन चिन्मात्रोपदेशेन उपदिश्यमानेन तत
त्त्वैव विश्राम्यावस्थानेन पुनर्भवस्य मोक्षस्य संभवः सिद्धिरित्यर्थः ॥१८॥ अथ वर्णाश्रमधर्मकस्थूलश
रीरात्सुखदुःखधर्मकलिंगशरीराद्भिन्नलक्षणं परिपूर्णं चैतन्यं सदृष्टांतं निरूपयति ॥७॥ यथैवादर्शमध्यस्थे
रूपेंतः परितस्तु सः ॥ तथैवास्मिन्शरीरेंतः परितः परमेश्वरः ॥१९॥ यथैवादर्शप्रतिबिंबिते शरीरादौ
अंतर्मध्ये परितो बहिश्च स आदर्शो व्याप्य वर्त्तते । तथैव स्वाध्यस्तेस्मिन्स्थूले शरीरे अंतःपरितश्च परं ब्र मेरुचर
ह्मात्मा व्याप्य स्थितः ॥ तथा च यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवदित्यादिस्वैर्वोपि प्रकरणार्थः संक्षे
पतः सूचितः ॥१९॥ आदर्शदृष्टांते परिछिन्नत्वादिभ्रमापत्तिः स्वाध्यस्थेस्त शरीरांतर्वर्त्तित्वं च न ६
स्पष्टमतो घटाकाशदृष्टांतेन बाह्याभ्यंतरव्यापकत्वमाह ॥७॥ एकं सर्वगतं व्योम बहिरंतर्यथा घटे ॥

नित्यं निरंतरं ब्रह्म सर्वभूतगणे तथा ॥२०॥ यथा सर्वगतमेकं नित्यं व्योम घटपटादौ बहिरंतश्च वर्त्तते
अह तथा नित्यं अविनाशि सर्वभूतगणे बहिरंतरं सर्वदा वर्त्तते इत्यर्थः ॥ एवंतत्र आत्मा सर्वस्यांतर इति श्रुतेः ॥
अतश्च बोधोहमिति ज्ञानखड्गेन देहादहंभावपाशं निकृत्य सुखी भवेत्यर्थः ॥२०॥ इति श्रीमद्विश्वे
श्वरविरचितायामष्टावक्रटीकायामात्मानुभवोपदेशप्रकरणं संपूर्णं ॥ ॥१॥ ॥ इत्थं गुरुकृपापीयूषास्वादा
नुभवमात्मनः । आविश्चकार माश्चर्यं शिष्यो निजगुरुं प्रति ॥ तत्र तावच्छिष्यः स्वरूपात्मानुभवमाविः कुर्वन्नेव
गुरुकृतोपकारख्यापनाय ज्ञापनाय प्राचीनसंस्कारवशाद्बाधितानुवृत्तमापतीतस्य मोहविडंबनस्य स्मरणमावि
ष्करोति ॥७॥ अहो निरंजनः शांतो बोधोहं प्रकृतेः परः ॥ एतावंतमहं कालं मोहेनैव विडंबितः ॥१॥ अहं दृष्टस्या
द्भुतस्यानुभवादहो इत्याश्चर्ये अहं निरंजनः सर्वोपाधिविनिर्मुक्तः ॥ शांतः सर्वविकारातीतः ॥ प्रकृतेः परो मायांधकार
स्पर्शशून्यो बोधः स्वप्रकाशः चिद्रूप इत्यर्थः ॥ गुरूपकारख्यापनाय मोहविडंबनमनुस्मरति एतावंतमिति ॥ एतावंतं
गुरूपदेशावधिकालं मोहेन देहात्माविवेकेन विडंबितएव सांप्रतं तु श्रीगुरुप्रसादादात्मानंदानुभवोस्मीति

विवक्षितोर्थः॥१॥ पूर्वकालीनं मोहविडंबनमुक्त्वा संप्रति गुरुप्रसादान्मम देहात्मविवेकोस्तीति सोपपत्तिक
८ माह॥ छ॥ यथा प्रकाशयाम्येको देहमेनं तथा जगत्॥ अतो मम जगत्सर्वमथवा च न किंचन॥२॥ अहं यथा जगत्
प्रकाशयामि। तथैवैनं स्थूलदेहं प्रकाशयामि। तथा च देहो नात्मा। प्रकाश्यत्वाज्जगद्वदित्यर्थः। कस्तर्हि जगद्
द्देहात्मनः संबंध इत्याशंक्याह युक्तिविचारादाध्यासिकः संबंधः परमार्थगत्या च न कश्चित्संबंधः इत्याह॥ अतो
ममेति॥ अतो दृश्यत्वात्सर्वं देहप्रमुखं जगन्मम मदीयमप्यध्यस्तमित्यर्थः॥ चावधारणे। अथवा परमार्थविचा
रेकिं च न किमपि देहादिकं मम न चैवमय्यध्यस्तमित्यर्थः॥ तदेवमध्यारोपापवादाभ्यां प्रकृतेः परो बोधोह
मित्येवात्र स्फुटीकृतं॥२॥ ननु लिंगदेहात्कारणदेहाच्च विवेकाभावे कथं प्रकृतेरतिरिक्तात्मबोध इत्याशंक्य
ततोपि विवेकजमात्मानुभवमाह॥ छ॥ सशरीरमहो विश्वं परित्यज्य मयाधुना॥ कुतश्चित्कौशलादेव पर
मात्मा विलोक्यते॥३॥ अहो इत्याश्चर्ये सशरीरं लिंगशरीरकारणशरीरसहितं विश्वं परित्यज्य विधानतः॥ ८
पृथक्सत्तया निषिध्य कुतश्चित् शास्त्राचार्योपदेशाल्लब्धात्कौशलाच्चातुर्यादेव परमश्रेष्ठ आत्मा म

या विलोक्यते तात्पर्यः परमात्मावलोकनोपाय इत्यर्थः॥३॥ शरीरविश्वस्य पृथक्सत्तया परित्यज्यतं सदृष्टांतं
निरूपयति॥ छ॥ यथा न तोयतो भिन्नास्तरंगाः फेनबुद्बुदाः॥ आत्मनो न तथा भिन्नं विश्वमात्मविनिर्गतं॥
४॥ यथा तरंगफेनबुद्बुदाश्च न तोयतो भिन्नाः तदुपादानत्वात्॥ तथा आत्मविनिर्गतं आत्मनः संजातं आ
त्मोपादानकं विश्वं आत्मनो न भिन्नं एवं च तोयतरंगादिषु जलं यथा स्वच्छचिद्रूपोहं विश्वस्मिन्नधिष्ठानभू
तो न मत्तो न्यद्विश्वमित्यर्थः॥४॥ सदृष्टांतांतरेणात्मरूपतया सर्वावलोकनं निरूपयति॥ छ॥ तंतुमात्रो भवे
देव पटो यद्वद्विचारितः॥ आत्मतन्मात्रमेवेदं तद्वद्विश्वं विचारितं॥५॥ स्थूलदृष्ट्या तंतुवैलक्षण्येन प्रतीयमानो
सन् पि पटो विचारितः विचारवीक्षितः सन् यद्वद्यथा तंतुमात्रो भवेत्॥ अस्मि तद्वत्तथा इदं स्थूलदृष्ट्या ब्रह्मवैल विश्वं
क्षण्येनापि प्रतीयमानं युक्त्या विचारितं सत् आत्मतन्मात्रमेव आत्मसत्तामात्रात्मकमेव। तेन तंतुः स्वसत्तया
यथा पटेनुगतस्तथात्मापि स्वसत्तयाधिष्ठानभूते विश्वस्मिन्ननुगत इत्यर्थः॥५॥ आत्मनैव सर्वं व्याप्तमित्यत्र दृ
ष्टांतांतरमाह॥ छ॥ यथैवेक्षुरसे क्लृप्ता तेन व्याप्तैव शर्करा॥ तथा मयि क्लृप्तं विश्वं मया व्याप्तं निरंतरं॥६॥ यथैव

८ वेक्षुरसे क्लृप्ता अध्यस्ता शर्करा तेन मधुररसेन व्याप्ता एवमत्रापि व्याप्ता ॥ तथैव मयि आनंदस्वरूपे क्लृप्तं अध्यस्तं विश्वं
मया आनंदेन निरंतरं बाह्याभ्यंतरं व्याप्तं तस्मात् विश्वमानंदात्मस्वरूपमेवेत्यर्थः ॥ तदेवमस्ति भाति प्रियमित्ये
वरूपेणाहमेव सर्वत्रावस्थित इति श्लोकत्रयविवक्षितोऽर्थः ॥ ६ ॥ विश्वं चिदात्मनो न भिन्नं तर्हि केन कारणेने
दं भासते केन च कारणेन न भासत इत्याशंक्याह ॥ ७ ॥ आत्माज्ञानाज्जगद्भाति आत्मज्ञानान्न भासते ॥ रज्ज्वज्ञा
नादहिर्भाति तज्ज्ञानाद्भासते न हि ॥ ७ ॥ आत्मन अज्ञानाज्जगद्भाति ॥ तथा आत्मन अधिष्ठानस्य ज्ञानान्न भास
ते ॥ अधिष्ठानाज्ञानादन्यस्य भाने अधिष्ठानज्ञानाच्च न भाने च लोकप्रसिद्धं दृष्टांतमाह ॥ रज्ज्वज्ञानादिति ॥ हि
निश्चितं यथा रज्जुस्वरूपस्याज्ञानादहिः सर्पो भाति तज्ज्ञानाद्रज्जुज्ञानान्न भासते ॥ ७ ॥ नन्वात्मन अज्ञाने स
ति आत्मप्रकाशाभावाज्जगत्कथं भासत इत्याशंक्य स्वरूपचैतन्यबलादेवेत्याह ॥ ८ ॥ प्रकाशो मे निजं रूपं ना
तिरिक्तोऽस्म्यहं ततः ॥ यदा प्रकाशते विश्वं तदाहं भास एव हि ॥ ८ ॥ प्रकाशो नित्यबोधः मे मम निजं स्वाभावि ८
कं स्वरूपं ॥ अहं ततः प्रकाशादतिरिक्तः भिन्नो नास्मि ॥ अतो मम यदा विश्वं प्रकाशते तदाहं भासादात्मप्र

सिद्धिरेव न स्यात् किंच

काशादेव भासते स्वरूपचैतन्यं चेद्भासकं तदा कथमज्ञानमिति चेन्नैवं न हि स्वरूपचैतन्यमज्ञानविरोधि किं त्व ज्ञान
साधकमेव ॥ अन्यथा जडस्य आत्मस्वरूपप्रकाशाभावे स्वात्मनोऽप्यसत्त्वप्रसक्तेर्जगदांध्यप्रसंगश्च तस्माद्यदा
विश्वं प्रकाशते तदात्मस्वरूपप्रकाशादेवेति भावः ॥ ८ ॥ स्वप्रकाशेऽपि मय्यात्मन्यज्ञानवशाद्विश्वं भासत इति म
हदाश्चर्यं सदृष्टांतमाह ॥ ९ ॥ अहो विकल्पितं विश्वमज्ञानान्मयि भासते ॥ रूप्यं शुक्तौ फणी रज्जौ वारि सूर्य
करे यथा ॥ ९ ॥ स्वप्रकाशेऽपि मयि अज्ञानाद्विकल्पितं रचितं अध्यस्तं मयि भासते अहो आश्चर्यमिदं यथा शुक्त्यादौ
रूप्यादिकं भासते तद्वदित्यर्थः ॥ ९ ॥ ननु मायाविकारित्वात्तेनैव विश्वमुत्पद्यते तेनैव लयमेति ननु चैतन्यात्मनी
ति सांख्यमतमपाकर्तुमाह ॥ १० ॥ मत्तो विनिर्गतं विश्वं मय्येव लयमेष्यति ॥ मृदि कुंभो जले वीचिः कनके क
टकं यथा ॥ १० ॥ इदं विश्वं मत्त एव विनिर्गतं मय्येव लयमेष्यति प्राप्स्यति यथा मृदादौ कुंभादिकं तद्वदित्यर्थः ॥
न चात्र प्रमाणाभाव इति शंकनीयं ॥ यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंती
ति श्रुतेः ॥ १० ॥ ननु ब्रह्म चेज्जगदुपादानकारणं तर्हि तस्य विकारित्वान्मृदादिवद्विनाशित्वापत्तिरित्याशंक्या

ह॥छ॥अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे॥ ब्रह्मादिस्तंबपर्यंतं जगन्नाशेपि तिष्ठतः॥११॥ अहो आश्च
८ र्यरूपोहं यस्य मम सर्वोपादानभूतस्यापि विनाशो नास्ति॥ न चोपादानत्वे सुवर्णादिवद्विनाशित्वापत्तिः सुवर्णा
दिवद्विकारित्वानंगीकाराद्विवर्त्ताधिष्ठानत्वेनैवोपादानत्वस्वीकारात्॥ अत एवाशेषकार्योपादानत्वादविना
शिने सर्वोत्कृष्टाय मह्यं नमः ब्रह्मादिदेवतावत्प्रलयेविनाशशंकां निराकरोति॥ ब्रह्मादिस्तंबपर्यंतं यज्जग
त्तस्य नाशेपि तिष्ठतः॥ प्रलयेपि स्थितिमतो यस्य मे नास्तीत्यर्थः॥ सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः॥११॥ न न्वात्मा
सुखदुःखावच्छेदकदेहवत्त्वान्नानातथाहंकाररूपत्वात्तत्तद्देशगमनागमनवानित्याशंक्याह॥छ॥अहो
अहं नमो मह्यं एकोहं देहवानपि॥ क्वचिन्न गंता नागंता व्याप्य विश्वमवस्थितः॥१२॥ अहो आश्चर्यरूपोहं आ
श्चर्यरूपाय मह्यं नमः॥ आश्चर्यरूपत्वमेवाह॥ एकोहमिति॥ नानासुखदुःखावच्छेदकदेहवानपि अहमेक एव॥
पनिःकंप यथा नानासंकल्पविकल्पैस्त्वावच्छेदकत्वेनोपाधिवानपि भानुरेक एवेत्यर्थः॥ क्वचिदिति॥ विश्वं व्याप्यावस्थितोप ८
रिछिन्नाहंकारविलक्षणोहं क्वचिदपि न गंता कुतोपि नागंता एवेत्यर्थः॥१२॥ न न्वात्मनः निःसंगशरीरसंसर्गे

तया जगद्विधारकत्वादित्याशंक्याह॥छ॥अहो अहं नमो मह्यं दक्षो नास्तीह मत्समः॥ असंस्पर्श शरीरेण येन स
र्वं चिरं धृतं॥१३॥ अस्य मपादार्थः पूर्ववदिति कारणात्मत्समो दक्षो असंभाव्यकार्यविधानचतुरः कोपि नास्ति
येन हेतुना शरीरेणासंस्पृश्य धृतपिंडेनोत्मुकवदसंबध्यैव चिरं बहुकालं विश्वं स्थावरजंगमं मया धृतं॥१३॥ न
न्वसंबंधस्य जगद्विधारकत्वं संबंधस्यैव दृष्टत्वाद्गृहादिधारकत्वादित्याशंक्याह॥छ॥अहो अहं नमो मह्यं य
स्य मे नास्ति किंचन॥ अथवा यस्य मे सर्वं यद्वाङ्मनसगोचरं॥१४॥ अहो आश्चर्यरूपोहं तस्मै मे नमः यस्य मे संबंध परमार्थतस्तु
किंचन किमपि ना स्ति परमार्थसतो द्वितीयस्याभावात्॥ अथवा यत्ता यावत् वाङ्मनसगोचरं तावत्सर्वं यस्य मे मम संबंध मिथ्या
तादात्म्यसंबंधः सुवर्णकुंडलादिवदित्यर्थः॥ अत एव सर्वसंबंधित्वासंबंधित्वाभ्यामाश्चर्यरूपाय मह्यं नमः॥ त्वसर्वसंबंधि
इत्यर्थः॥१४॥ ननु त्रिपुटीरूपसंसारस्य पारमार्थिकत्वात्कथं मिथ्यातादात्म्यसंबंधो जगदात्मनोरित्याशंक्या
ह॥छ॥ ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवं॥ अज्ञानाद्भाति यत्रेदं सोहमस्मि निरंजनः॥१५॥ ज्ञा
नं ज्ञेयं तथा ज्ञाता इत्यादिकं त्रितयं त्रिपुटीरूपं सर्वं वास्तवं पारमार्थिकं नास्ति यत्र मयि इदं त्रितयं अ

१० ज्ञानादनिर्वचनीयाज्ञानान्मिथ्यातादात्म्येनाध्यस्तं भाति॥ अत एव वस्तुगत्याहं निरंजनः प्रपंच
मलसंबंधशून्योस्मीत्यर्थः॥१५॥ ननु निरंजनस्य कथं दुःखसंबंध इत्याशंक्याह द्वैतं भ्रांतिमूलकएवा
सौ न तु वास्तवइत्याह॥७॥ द्वैतमूलमहो दुःखं नान्यत्तस्यास्ति भेषजं॥ दृश्यमेतन्मृषा सर्वं एकोहं चिद्र
सोमलः॥१६॥ अहो आश्चर्यं निरंजनस्याप्यात्मनः द्वैतमूलं दुःखं द्वैतभ्रमो तु दुःखाध्यासो न तु वास्तवं दुः
खमित्यर्थः॥ दुःखाध्यासमहाव्याधेः किं भेषजमित्याशंक्याह। नान्यदिति॥ अमलो मायातत्कार्यातीत
श्चिद्रसश्चिन्मात्रस्वरूप एकोहं एतद्व्यतीयमानं सर्वं दृश्यं जडजातं मृषा मिथ्या न पारमार्थिकमिति बोधा
दन्यत्तस्यात्रिविधदुःखव्याधेः भेषजं नास्तीत्यर्थः॥१६॥ नन्वयं द्वैतप्रपंचाध्यासः किंनिमित्तः किमुपादा
नक इत्याशंक्याह। ७॥ ॥ बोधमात्रश्चिदेकस्वरूपोहमेव पारमार्थिकमया सर्वोपादानभूतेन कर्त्रा
ज्ञानादखंडज्ञानरूपाद्भिन्नाद्दहंकारपरस्योपाधिर्द्वैतप्रपंचः कल्पितः॥ एवं विचारस्य फलमाह॥ १०
एवंमिति। एवं विमृशतो विचारयतो मम निर्विकल्पे निरस्तद्वैते स्वरूपचैतन्ये स्थितिः प्राप्तिर्जाता॥१७॥
बोधमात्रोहमज्ञानादुपाधिः कल्पितो मया॥ एवं विमृशतो नित्यं निर्विकल्पे स्थितिर्मम॥१७॥

ननु स्वरूपचैतन्यप्राप्तिरूपा मुक्तिश्चाद्युक्तविचारजन्या चेत्तदा मुक्तेर्विनाशापत्तिः जन्यभावस्य विनाशित्वनि
यमात् विचाराजन्या चेत्तदा विचाररहितानामपि मोक्षापत्तिरित्याशंक्याह॥७॥ अहो मयि स्थितं विश्वं वस्तुतो न
मयि स्थितं॥ न मे बंधोस्ति मोक्षो वा भ्रांतिः शांता निराश्रया॥१८॥ वस्तुतो मे मम बंधो नास्ति न च मोक्षोप्यस्ति नि
त्यचिद्रूपत्वात् तर्हि शास्त्रविचारस्य किं फलमित्याह। भ्रांतिनिवृत्तिरेव तत्फलमित्याह॥ अहो मयीति। अहो आ
श्चर्यं मयि स्थितमपि विश्वं वस्तुतः कालत्रयेपि मयि न स्थितमिति विचारतोपि भ्रांतिरेव शांता न तु परमानंदा
वाप्तिर्जनिता आत्मनः सर्वदा परमानंदरूपत्वात्॥ कीदृशी भ्रांतिर्निराश्रया॥ उक्तविचारादज्ञानस्य नष्ट
त्वान्निर्मूलेत्यर्थः॥१८॥ नन्वधिष्ठानस्योपादानस्य सत्वान्मुक्तेष्वपि प्रपंचोदयः स्यादित्याशंक्याह॥७॥ सशरीर
मिदं विश्वं न किंचिदिति निश्चितं॥ शुद्धचिन्मात्र आत्मा च तत्कस्मिन्कल्पनाधुना॥१९॥ सशरीरस
हितमिदं विश्वं न किंचित्सत्यं नाप्यसत्यमिति निश्चितं॥ नेह नानास्ति किंचनेति श्रुतेः॥ आत्मा च चिन्मा
त्र शुद्धः मायामलशून्यस्तस्मात्कारणादधुनाऽज्ञाननिवृत्तौ सत्यां कस्मिन्नधिष्ठाने विक्षेपकल्पनास्यान्न

११ कस्मिन्नपीत्यर्थः॥१९॥ ननुसर्वस्यप्रपंचस्यावास्तवत्वेवर्णिः ज्ञात्वा अयंशरीरमप्यवास्तवमेवेतिशरीर
विशेषमधिकृत्यप्रवर्त्तमानंविधिनिषेधशास्त्रमप्यवास्तवंस्यात्॥ तथाचतद्बोधितंस्वर्गनरकयोरप्यवास्त
वत्वात्स्वर्गादावनुरागोनरकादिभ्यश्चभयंनस्यात्॥ किंचशास्त्रबोधितौबंधमोक्षावपिवास्तवौनस्यातामि
त्याशंक्यैष्टापत्त्यापरिहरति॥ मू०॥ शरीरंस्वर्गनरकौबंधमोक्षौभयंतथा॥ कल्पनामात्रमेवैतत्किंमेकार्यं
चिदात्मनः॥२०॥ शरीरादिकमेवतत्कल्पनामात्रमेवचिदात्मनःसच्चिदानंदस्वरूपस्यममएतैःशरीरा
दिभिः किंकार्यंनकिं अपिकार्यंसाध्यंविधिनिषेधादिकंत्वविद्यावंतमेवाधिकृत्यप्रमाणमित्यप्रमाणमि
त्यर्थः॥२०॥ स्वर्गादिभिः किंमेकार्यमितिप्रागुक्तं॥ अथेहलोकेचापिमेकार्यंनास्तीत्याह॥ मू०॥ अहोजनस
मूहेपिनद्वैतंपश्यतोमम॥ अरण्यमिवसंवृत्तंक्वरतिंकरवाण्यहं॥२१॥ नद्वैतंपश्यतोमम अहोइत्याश्चर्येज
नसमूहेपिअरण्यमिवसंवृत्तंसंजातंतस्मादहंमिथ्यात्वेक्वरतिंप्रीतिंकरवाणिनक्वापीत्यर्थः॥२१॥ ११
ननुशरीरस्याहंममतास्पदतयानुरागविषयत्वादहंकारस्याप्यहंतास्पदतयानुरागविषयत्वात्तत्रस्ने

हास्यादित्याशंक्याह॥ मू०॥ नाहंदेहोनमेदेहोजीवोनाहमहंहिचित्॥ अयमेवहिमेबंधआसीद्याजीवि
तेस्पृहा॥२२॥ अहंदेहोनजडत्वान्नापिमेदेहःममनिःसंगत्वात्॥ जीवोहंकारोनाहंकर्तृत्वात्कस्त
र्हित्वमित्याशंक्याह॥ अहंहिचिदितिचित्स्वरूपएवाहमित्यर्थः॥ कुतस्तर्हिविवेकिनामपिजीवि
तेस्पृहेत्याशंक्याह॥ अयमेवहीति॥ याजीवितेस्पृहाअयमेवमेबंधःप्रागासीत्जीवनार्थीहिपुमान्सुवर्णह
रणादिकमपिकरोतीति। जीवनेच्छाबंधःबंधहेतुत्वात्॥ इदानींतुसच्चिदानंदानुभवशालिनोममासंगस्प
र्शाणानुषंगबंधनरूपेजीवितेपिस्पृहानास्तीत्यर्थः॥२२॥ अथस्वस्यसर्वाधिष्ठानत्वंपश्यन्नाह॥ मू०॥ अहो
भुवनकल्लोलैर्विचित्रैर्द्राक्समुत्थितं॥ मय्यनंतमहांभोधौचित्तवातेसमुद्यते॥२३॥ अहोइत्याश्चर्येअ
नंतमहांभोधौमयिचित्तवातेसमुद्यतेसमुत्पन्नेसतिविचित्रैर्नानाविधैःभुवनकल्लोलैःभुवनरूपैस्तरं
गैःद्राक् असर्थंसमुदितंउदयोलब्धः॥ यथावारिधेस्तरंगाइवतथामत्तोभुवनानिवस्तुतोनभिन्नानी
त्यर्थः॥२३॥ प्रारब्धक्षयदशामनुवदति॥ मू०॥ मय्यनंतमहांभोधौचित्तवातेप्रशाम्यति॥ अभाग्याज्जीववणि

जोजगत्सोतोविनश्वरः॥२४॥ अनंतमहांभोधौ सर्वव्यापकचित्समुद्रे मयि चित्तवाते संकल्पविकल्पकंपवा
१२ तेनी मनो मारुते प्रशाम्यति सति संकल्पादिरहिते सति जीववणिजो जीवात्मलक्षणस्य वणिजं कर्त्तुः अ
भाग्यात् आरथक्षयात् जगत्सोतः शरीरादिनौकासमूहविनाशवान्भतीत्यर्थः॥२४॥ अथवाधितानुवृत्त्यास्व
स्मिन्सर्वजीवव्यवहारं प्रपश्यन्नाह॥ ॥ मय्यनंतमहांभोधावाश्चर्यं जीववीचयः॥ उद्यंति घ्नंति खेलंति प्रविशंति स्व
भावतः॥२५॥ आश्चर्यं निःक्रिये निर्विकारे मयि अनंतमहांभोधौ जीवा एव वीचयस्तरंगा उद्यंति अभिव्यक्ता भवंतीव
मिथः परस्परं घ्नंति ताडयंतीव शत्रुभावाध्यासात्॥ अन्ये च मिथः खेलंति इव मित्रभावाध्यासात्॥ अविद्याकामकर्मेन्द्र
येमति च मयि विशति च कस्मात्स्वभावतः॥ अविद्याकामकर्म्मस्वभाववशात्॥ उत्पत्त्यादिकं प्राप्नुवंति स्वभावतः॥
स्वस्य चिद्रूपस्यांशरूपेण स्वभावतः॥ तत्रैव प्रविशंति घटाकाशादय इव महाकाश इति विवेकः॥२५॥ इत्यष्टावक्रप्रक
रणे शिष्योल्लासः॥ ॥ प्र॰ ॥ द्वितीयेस्मिन्प्रकरणे शिष्येणानुभवस्थितिः॥ निवेदिता गुरोस्तुष्टैः च आश्चर्यपूरः॥ ॥ १२
इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां शिष्येण कृतात्मानुभवोल्लासः पंचविंशतिकं॥ ॥ ॥२॥ ॥ ॥

शिष्यानुभवपीयूषेणानेपि कृपावशात्॥ तद्दृढज्ञानपरीक्षार्थं शिष्यमाह गुरुः पुनः॥ विज्ञातानुभवमपि स्वशिष्यं
व्यवहारस्थितं दृष्ट्वा तद्दृढज्ञानपरीक्षार्थं न व्यवहारे स्थितिमुपादिशति॥ ॥ अविनाशिनमात्मानमेकं विज्ञाय
तत्त्वतः॥ तवात्मज्ञस्य धीरस्य कथमर्थार्जने रतिः॥१॥ हे शिष्य अविनाशिनं निर्विकल्पं त्रैकालिकसत्ताशालिनं
कालतो व्यवच्छेदशून्यं आत्मानं देशतो व्यवच्छेदशून्यं एकं वस्तुतो व्यवच्छेदशून्यं च स्वरूपं विज्ञाय तादध्या
स तत्त्वतः आत्मज्ञस्य अत एव धीरस्य तव अर्थार्जने व्यवहारिकार्थसंग्रहे कथं रतिः प्रीतिः न घटते इत्याक्षेपः॥१॥
ननु ज्ञाने सति विषयसंग्रहः कथमनुपपन्न इत्याशंक्य विषयप्रीतेरात्माज्ञानमूलत्वं सदृष्टांतं सोपपत्तिकमा
ह॥ ॥ आत्माज्ञानादहो प्रीतिर्विषयभ्रमगोचरे॥ शुक्तेरज्ञानतो लोभो यथा रजतविभ्रमे॥२॥ अहो इति संबो
धने हे शिष्य विषयभ्रमगोचरे विषययाप्रीतिः॥ सा आत्माज्ञानादेव भवति न तु ज्ञानात्तद्व्यतिरिक्तविषयाणां बाध
दिति भावः॥ अत्र लोकप्रसिद्धं दृष्टांतमाह शुक्तेरिति॥ यथा रजतविभ्रमे सति शुक्तेरज्ञानतो लोभः पामराणाम
पि अनुभवसाक्षिक इत्यर्थः॥ विषयभ्रमगोचर इत्यत्र विशेषस्यापि पूर्वं शेष्येणावक्तुलं इत्यत्र बहुलग्रहणादात्र

१२ त्रेदं वदात्मा ज्ञानादीनि पदं विषयत्वमगोचर इत्यनेनापि संबध्यते अज्ञानमूला विषयप्रीतिरिति भावः ॥ अथ
सर्वाधिष्ठानतयात्मनि ज्ञाने सति विषयेषु पुनः न प्रीतिः संबध्यत इत्यादि ॥ ॥ विश्वं स्फुरति यत्रेदं तरंगा इव सा
गरे ॥ सोहमस्मीति विज्ञाय किं दीन इव धावसि ॥ ३ ॥ सागरे तरंगा इव यथा पृथक् सत्तारहितास्तद्वद्यत्रेदं विश्वं पृथक्
सत्तारहितं स्फुरति स तत्पदार्थो हमस्मीति विज्ञाय मा ज्ञात्वा त्वं दीन इव ममेदं भवत्विति तृष्णाकुलः सन् किं धावसि
कथं धावसीति आक्षेपः ॥ ३ ॥ तदेव श्लोकत्रयेण ज्ञानिनो शिष्ये दृश्यमानं विषयव्यवहारमाक्षिपेदानीं सर्वज्ञानि
शुविषयव्यवहारं शिष्यपरिक्षार्थं गुरुराक्षिपति ॥ ॥ श्रुत्वापि शुद्धचैतन्यमात्मानमतिसुंदरं ॥ उपस्थेत्यंतसंसक्तो
मालिन्यमधिगच्छति ॥ ४ ॥ शुद्धचैतन्यं श्रुत्वापि गुरुमुखाद्वेदांतवाक्यतः साक्षात्कृत्वापि उपस्थे समीपस्थे वि
षये त्यंतसंसक्तः सन्नात्मज्ञः कथं मालिन्यं मोहमधिगच्छति प्राप्नोति ॥ अस्य प्रकरणस्य शिष्यजिज्ञासार्थमाक्षे
पत्वइयैव प्रवृत्तत्वाद्यत्राक्षेपवाचकं पदं न दृश्यते तत्र तदध्याहर्तव्यं ॥ ४ ॥ पुनरप्याश्चर्यमुद्रयाक्षिपति ॥ ॥ स १२
र्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ मुनेर्जानत आश्चर्यं ममत्वमनुवर्तते ॥ ५ ॥ सर्वभूतेषु ब्रह्मादिस्त्था

वरांतेषु आत्मानं अधिष्ठानभूतं जानतः ॥ सर्वभूतानि वात्मनि रज्जौ भुजंगवदध्यस्तानि जानतो मुनेर्विषयेषु मम
त्वमनुवर्तते इति आश्चर्यं असंभाव्यं । नहि शुक्तिकायामध्यस्तरजते इति जानतस्तत्र ममत्वं संभवतीति भावः ॥ ५ ॥
आस्थितः परमाद्वैतं मोक्षार्थेपि व्यवस्थितः ॥ आश्चर्यं कामवशगो विकलः केलिशिक्षया ॥ ६ ॥ आस्थितः परमं स
जातीयविजातीयस्वगतभेदशून्यमद्वैतमास्थितः ॥ साक्षादनुभवन् तथा मोक्षस्वरूपोर्थः सच्चिदानंदात्मा तत्र व्यव
स्थितः तैदेकपरायणोपि कामवशगः सन् केलिशिक्षया नानाक्रीडाभ्यासेन विकलो दृश्यते इत्याश्चर्यं ॥ ६ ॥ उद्भूतं ज्ञान
दुर्मित्रमवधार्यातिदुर्बलः ॥ आश्चर्यं काममाकांक्षेत् कालमंतमनुश्रितः ॥ ७ ॥ उद्भूतकामं ज्ञानदुर्मित्रं ज्ञानस्यात्यंत
वैरिणमवधार्य निश्चित्यापि अतिदुर्बल अतिशयेन बलशून्य इव ज्ञानी कामं विषयमाकांक्षेत् कामं वांछति इदमा
श्चर्यं कीदृशः अंतकालमनुश्रितः ॥ नाहं समीपवर्तिन्यंतकाले सति विवेकिनो विषयस्पृहायुक्तेति भावः ॥ ॥ ऐहिका
[illegible] इहामुष्मिकभोगविरक्तस्य नित्यमात्मतत्त्वमनित्यं शरीरादिकं तद्विवेकिनो मोक्षः सच्चिदानंदस्तत्र कामो तः
करणं यस्य एवंविधस्य ज्ञानिनोपि मोक्षादेव असद्रूपतनुधनवियोगादेव विभिषिका भयं दृश्यते । इति आश्चर्यं ॥ नहि
इहामुत्र विरक्तस्य नित्यानित्यविवेकिनः ॥ आश्चर्यं मोक्षकामस्य मोक्षादेव विभीषिका ॥ ८ ॥
३

१४ स्वप्नदृष्टवत्तु च न नाशेऽपि जाग्रतां भयं क्वापि दृष्टमिति भावः ॥ ८ ॥ एवमाक्षेपमुद्रया पूर्वमुक्तं ॥ अथ ज्ञानिनस्तोषरो
षाव तुच्छित्वाविति अष्टकुंठितो निरूपयति ॥ मू० ॥ धीरस्तु भोज्यमानोऽपि पीड्यमानोऽपि सर्वदा ॥ आत्मानं केवलं पश्यन्न
तुष्यति न कुप्यति ॥ ९ ॥ धीरो ज्ञानी लोकैर्विषयान्भोज्यमानोऽपि तथा निंदादिना पीड्यमानोऽपि सर्वदा आत्मानं केव
लं सुखदुःखभोगादिरहितं पश्यन्न तुष्यति न कुप्यति तोषरोषहेतूनां केवलस्य आत्मनः असंभवज्ञानादिति भावः ॥
९ ॥ किं च तोषहेतूनां स्तुतिनिंदादीनां शरीरधर्मत्वाच्छरीरस्य चात्मभिन्नत्वेनानुसंधानात्कथं ज्ञानिनस्तोष
रोषाविति आह ॥ मू० ॥ चेष्टमानं शरीरं स्वं पश्यत्यन्यशरीरवत् ॥ संस्तवे चापि निंदायां कथं क्षुभ्येन्महाशयः ॥ १० ॥ स्वं श
रीरं स्वात्मभिन्नं चेष्टाश्रयत्वादन्यशरीरवदिति यः पश्यति महाशयः महति ब्रह्मणि आशयो यस्य सः । संस्तवे स्तुतावपि
च निंदायां कथं क्षुभ्येत् कथं तोषरोषरूपां विक्रियां व्रजेदित्याक्षेपः ॥ १० ॥ मार्यमारकयोरसत्यत्वानुसंधानात्संनिहिते
ऽपि मृत्यौ ज्ञानिनस्त्रासः कथमित्याह ॥ मू० ॥ मायामात्रमिदं विश्वं पश्यन्विगतकौतुकः ॥ अपि सन्निहिते मृत्यौ क
थं त्रस्यति धीरधीः ॥ ११ ॥ इदं दृश्यमानं विश्वं मार्यमारकादिरूपं समग्रं मायामात्रमसद्रूपं पश्यन्नत एव कुत इदंश १४

रीरादिकं जायते कुतो विलयं यातीत्येवंरूपः कौतुकरहितस्तथा धीरः स्वस्वरूपादचला धीर्यस्य स सन्निहिते मृत्यौ सत्यपि
कथं त्रस्यतीत्याक्षेपः ॥ ११ ॥ सर्वेषामाक्षेपाणां समर्थनार्थं ज्ञानिनो निरूपत्वमाह ॥ मू० ॥ निःस्पृहं मानसं यस्य नैराश्ये
ऽपि महात्मनः ॥ तस्यात्मज्ञानतृप्तस्य तुलना केन जायते ॥ १२ ॥ यस्य नैराश्येऽपि मोक्षेऽपि मानसं निःस्पृहं तस्यात्मज्ञानतृप्तस्य
ब्रह्माहमस्मीति ज्ञानतः ॥ समाप्तसर्वमनोरथस्य केन समं तुल्यता जायते न केनापीत्यर्थः ॥ १२ ॥ ज्ञानिनः हानोपादा
नादिव्यवहारमाक्षेपति ॥ मू० ॥ स्वभावादेव जानानो दृश्यमेतन्न किंचन ॥ इदं ग्राह्यमिदं त्याज्यं स किं पश्यति धीरधीः
॥ १३ ॥ प्रपंचो मिथ्या दृश्यत्वात् ॥ शुक्तिकारजतवदित्यनुमानादेतद्दृश्यं न किंचन न सन्नाप्यसदिति जानानो निश्चय
वान्यो धीरधीः स इदं ग्राह्यमिदं त्याज्यमिति कथं पश्यतीत्याक्षेपः ॥ १३ ॥ अत्र हेतुमाह ॥ मू० ॥ अंतस्त्यक्तकषायस्य निर्द्वं
द्वस्य निराशिषः ॥ यदृच्छयागतो भोगो न दुःखाय न तुष्टये ॥ १४ ॥ अंतःकरणस्थाः कषायाः विषयवासना येन तस्य
निर्द्वंद्वस्य शीतोष्णादिसमचित्तस्य । अत एव निराशिषः विषयवासनाविहीनस्य यदृच्छया दैवयोगादागतः प्राप्तो भोगः
भुज्यमानो विषयो दुःखाय न भवति तुष्टये च तन्न भवति ॥ १४ ॥ इत्याक्षेपपूर्वोपदेशचतुर्दशकं ॥ इति श्रीमद्विश्वेश्व

ऽवरचितायामष्टावक्रटीकायामाक्षेपद्वारोपदेशकं नाम तृतीयं प्रकरणं॥ ॥३॥ ॥गुरुणैवमुपाक्षिप्तः शिष्यो ज्ञा
नदशोल्लसत्॥ ज्ञानिन्यशेषचेष्टानां स्पष्टमाचष्टसेत्तवं॥१॥ एवं तावद्गुरुणा परीक्षार्थमाक्षिप्तः शिष्यः प्रारब्धवशा
द्बाधितानुवृत्त्या ज्ञानिन्यपि सर्वव्यवहाराणामुपपत्तिमात्मज्ञानोल्लासवशादेवाह॥ षड्भिः श्लोकैः॥छ॥ हंतात्मज्ञस्य
धीरस्य खेलतो भोगलीलया॥ न हि संसारवाहीकैर्मूढैः सह समानता॥१॥ हंतेत्यात्मज्ञानोल्लसितहर्षे हे गुरो आ
त्मज्ञस्य सर्वाधिष्ठानतया स्वात्मानं जानतः॥ अत एव धीरस्याविषयैरविक्षिप्तचित्तस्य भोगलीलया विषयभोगा
दिरूपया लीलया क्रीडया प्रारब्धवशात्प्रवृत्तया खेलतः। क्रीडतः संसारवाहीकैः संसारवाहनपशुभिर्मूढै
र्देहाद्यात्मवादिभिः सह न हि समानता नैव तुल्यत्वं॥ तदुक्तं भगवता तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः॥ गु
णा गुणेषु वर्त्तंत इति मत्वा न सज्जते॥१॥ ननु संसारव्यवहारस्थो ज्ञानी कथं न संसारीतुल्य इत्याशंक्य हर्षादिराहि
त्यात्तस्य वैलक्षण्यमाह॥छ॥ यत्पदं प्रेप्सवो दीनाः शक्राद्याः सर्वदेवताः॥ अहो तत्र स्थितो योगी न हर्षमुपगच्छति॥२॥ अहो
इति संबोधने हे गुरो यत् अहो आश्चर्ये शक्राद्याः सर्वदेवता अपि यत्पदं प्रेप्सवः यत्पदं प्राप्तिमिच्छंतो दीनास्तदप्राप्ति

तः॥ शोच्या वर्त्तंते तत्र साक्षिदानंदात्मपदे स्थितस्त्वंपदार्थैक्यज्ञानात्तत्र वर्त्तमानो योगीत्थंसाक्षात्कारो विषयभोगा
त्र हर्षं प्राप्नोति॥ नापि तदपगमादुद्विग्नो भवतीत्यर्थः॥२॥ तत्त्वज्ञस्य विध्यकिंकरत्वं पुण्याद्यसंस्पर्शमाह॥छ॥ तज्ज्ञस्य
पुण्यपापाभ्यां स्पर्शो ह्यंतर्न जायते॥ न ह्याकाशस्य धूमेन दृश्यमानापि संगतिः॥३॥ तत्त्वंपदार्थैक्याभिज्ञस्य पुण्यपापा
भ्यां सह अंतःकरणधर्माभ्यां स्पर्शः संबंधो न जायते॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते इति स्मृतेः॥ अत्र दृष्टांतमा
ह॥ न हीति॥ यथा हि आकाशस्य धूमेन॥ सह दृश्यमानापि संगतिर्नास्ति तथात्मज्ञस्य न पुण्यादिसंगतिरित्यर्थः॥
ननु कर्माणि कुर्वते कथं न पुण्यादिस्पर्श इत्याशंक्य ज्ञानिनो विधिनिषेधानियम्यत्वमाह॥छ॥ आत्मैवेदं जगत्स
र्वं ज्ञातं येन महात्मना॥ यदृच्छया वर्त्तमानं तं निषेद्धुं क्षमेत कः॥४॥ येन महात्मना इदं दृश्यमानं सर्वं जगदात्मैवेति ज्ञातं
तं ज्ञानिनं यदृच्छया प्रारब्धवशादेव वर्त्तमानं को वा चक्रवर्त्यपि निषेद्धुं प्रवर्त्तयितुं वा क्षमः समर्थो न कोपीत्यर्थः॥ तदुक्तं शारी
रकभाष्ये॥ अविद्यावद्विषयो वेद इति॥ प्रबोधनीय एवासौ सुप्तो राज्येव बंदिभिरिति स्मृतिरपि॥४॥ ननु ज्ञानिनोपि न यदृच्छया
प्रवर्त्तनं किं तु इच्छानिच्छे वेत्याशंक्याह॥छ॥ आब्रह्मस्तंबपर्यंते भूतग्रामे चतुर्विधे॥ विज्ञस्यैव हि सामर्थ्यमिच्छानिच्छाविवर्जने॥

१६

५॥ आब्रह्मस्तंबपर्यंते चतुर्विधे भूतग्रामे इच्छानिच्छे विवर्जयितुमशक्ते नथापि विज्ञस्यैव इच्छाद्वेषनिवर्त्तने सामर्थ्यमतो यदृ
च्छयाप्रवर्तमानो ज्ञानी न विधाननियम इत्यर्थः॥५॥ आत्मज्ञानेन द्वितीयस्य बाधितत्वात् ज्ञानिनां भयहेतुः कोपि नास्तीत्युपसं
हरति॥ मू०॥ आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरं॥ यद्वेत्ति तत्स कुरुते न भयं तस्य कुत्रचित्॥६॥ कश्चित्सहस्रेषु एक एव
जगदीश्वरं तत्पदार्थं आत्मानं त्वंपदार्थं अद्वयमभिन्नतया जानाति स यद्वेत्ति प्रारब्धवशात् बाधितानुवृत्त्या इदं कर्त्तव्यमिति मन्य
ते तत्करोति एवं कुर्वतस्तस्य कुत्रचिदिह वामुत्र वा भयं नास्ति भयहेतोर्द्वैतज्ञानबाधितत्वादिति भावः॥६॥ इत्युल्लास
षट्कं॥ इति श्रीमहेश्वरविरचितायामष्टावक्रटीकायां शिष्यप्रोक्तानुभवोल्लासषट्कं चतुर्थं प्रकरणं॥ ॥४॥ ॥एवमुल्ला
सषट्केन स्वशिष्येणापि परीक्षिते॥ गुरुर्दृष्टोपदेशार्थं लययोगमथाब्रवीत्॥ ॥एवमुल्लासषट्केन स्वशिष्येण परिक्षिते सति पु
नर्दृष्टोपदेशार्थमाचार्यो लययोगमुपदिशति श्लोकचतुष्टयेन॥ मू०॥ न ते संगोस्ति केनापि किं शुद्धस्त्यक्तुमिच्छसि॥ संघातविलयं कु
र्वन्नेवमेव लयं व्रज॥१॥ हे शिष्य शुद्धबुद्धस्वभावस्य तव केनापि देहगेहादिनाहंकारममकारास्पदेन न संगोस्ति अतः शुद्धो १६
संगस्त्वं किं त्यक्तुं कमुपादातुं चेच्छसि तस्मात् संघातमदेहस्य विलयं कुर्वन्नाहं देह इति निरसनं कुर्वन्नेव देहादिनिरसनरूपमे

मेव लयं व्रज॥१॥ उदेति भवतो विश्वं वारिधेरिव बुद्बुदः॥ इति ज्ञात्वैकमात्मानमेवमेव लयं व्रज॥२॥ हे शिष्य भवतः स
काशाद्विश्वमुदेति भवदभिन्नमेव यथा वारिधेः सकाशात् बुद्बुदो वारिधेरभिन्न उदेति इत्येवंप्रकारेण एकं सजातीयवि
जातीयभेदशून्यमात्मानं ज्ञात्वा एवमेवैकात्मज्ञानमेव लयं व्रज॥२॥ ननु प्रत्यक्षतो भिन्नतया हारसर्पादिभेदे प्रती
यमाने कथं हारादिविलय इत्यत्राह॥ मू०॥ प्रत्यक्षमप्यवस्तुत्वाद्विश्वं नास्त्यमले त्वयि॥ रज्जुसर्प इव व्यक्तमेवमेव लयं व्रज॥३॥
प्रत्यक्षमपि व्यक्तं दृश्यं विश्वममले त्वयि नास्त्येव॥ अवस्तुत्वात् रज्जुभुजंगवत् तस्मादेवमेव लयं व्रज अद्वितीयस्य हेयोपादे
यस्याभावादित्यर्थः॥३॥ समदुःखसुखः पूर्ण आशानैराश्ययोः समः॥ समजीवितमृत्युः सन्नेवमेव लयं व्रज॥४॥ पूर्ण आ
त्मानंदपूर्णस्त्वमत एव दैववशात् तयोः सुखदुःखयोः समः इच्छायोश्च समस्तथा जीवने मृत्यौ वा सममानिर्विकारः सुखदुःखा
दीनामनात्मधर्माणां तुच्छत्वानुसंधानात्त्वं सुखदुःखादिषु समः॥ ब्रह्मदृष्टिरूपं लयं व्रजेत्यर्थः॥४॥ इति श्रीमहेश्व
रविरचितायामष्टावक्रटीकायामाचार्योक्तलयचतुष्टयं नाम पंचमं प्रकरणं॥ ॥५॥ ॥गुरुणैवं परीक्षार्थमुपदिष्टे लये सति
पूर्णात्मनो लयादीनां शिष्योसंभवमब्रवीत्॥ तदेवं गुरुणा तं तत्परीक्षार्थं लययोगे समुपादिष्टे सति लयाद्यभावोपपादकमा

१७ त्मा ज्ञानमनुभवन्नेव शिष्यः पूर्णात्मनो लयाद्यसंभवमाह। आकाशादि चतुर्भिः श्लोकैः॥ छ॥ आकाशवदनंतोहं घट
वत्प्राकृतं जगत्॥ इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः॥१॥ अहमाकाशवदनंतः॥ नन्वनंतस्यात्मनो देहादिनिवासः
कथं इत्यत आह॥ घटवत् इति॥ प्राकृतं प्रकृतिकार्यं जगद्देहादिकं घटवद्यथा घटाकाशस्यावच्छेदको निवासस्थानं च तथात्म
नो देहादिरेकदेशावच्छेदक एव व्योमवद्घटादिरित्यर्थः॥ अत्र प्रमाणमाह। इति इति। इत्येवं वेदांतसिद्धं ज्ञानमनुभवरूपम
प्रमितो नान्यथा भाव शंकेत्यर्थः॥ तथेति। तथा सत्यात्मनो नंतत्वे तस्यात्मनस्त्यागो ग्रहणं लयश्च न संभवति परिच्छि
न्नस्यैव घटादेस्त्यागादिदर्शनादित्यर्थः॥१॥ घटाकाशदृष्टांते देहात्मनो भेदशंकास्यादित्यपरितोषादाह॥ छ॥ महोदधिरिति स्पष्टं॥
॥ महोदधिरिवाहं स प्रपंचो वीचिसन्निभः॥ इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः॥२॥ समुद्रवीचिदृष्टांते देहात्मनोर्विकारविका
रिशंकास्यादित्यपरितोषादाह॥ अहं स इति स्पष्टं॥ छ॥ अहं स शुक्तिसंकाशो रूप्यवद्विश्वकल्पना॥ इति ज्ञानं तथैतस्य न त्या
गो न ग्रहो लयः॥३॥ ॥छ॥ शुक्तिदृष्टांतेप्यात्मनि परिच्छिन्नत्वशंकास्यात्तद्व्यावृत्त्यर्थमाह॥ छ॥ अहं वा सर्वभूतेषु सर्वभू १७
तान्यथो मयि॥ इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः॥४॥ अहं वा अहमेव सर्वभूतेषु प्राकृतिकेषु सत्तास्फूर्त्यादि

पदत्वेनास्मि अथातो देहिनः सर्वभूतान्यधिष्ठानभूते मयि वर्तंते॥ इति ज्ञानं वेदांतसिद्धं तथा सत्यात्मनस्त्यागादिकं न
संभवतीत्यर्थः॥४॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां शिष्यप्रोक्तमुत्तरचतुष्टयं नाम षष्ठं प्रकरणं॥
६॥ ॥लययोगाननुष्ठानेप्यवहारं निरंकुशं आशंक्य शिष्यः सोल्लासादब्रवीद्गुरुमुत्तरं॥१॥ ननु लययोगाभावे संसा
रविक्षेपो निरंकुशप्रसरः स्यादित्याशंका तस्यानिष्टत्वाभावमनुभवपंचकेनोत्तरमाह॥ छ॥ मय्यनंतमहांभोधौ विश्व
पोत इतस्ततः॥ भ्रमति स्वांतवातेन न ममास्त्यसहिष्णुता॥१॥ हे शिष्य मय्यात्मन्यनंते महासमुद्रे विश्वाख्यपोतनौका
स्वांतवातेन मनःपवनेन इतस्ततो भ्रमति अत्र ममासहिष्णुता असहनशीलता नास्ति समुद्रस्येव नौकापरिभ्रमण इत्यर्थः॥
१॥ जगद्व्यवहारस्यानिष्टत्वाभावः पूर्वमुक्तः। जगदुदयापगमयोरपि नानिष्टतेत्याह॥ छ॥ मय्यनंतमहांभोधौ जगद्वी
चिः स्वभावतः॥ उदेतु वास्तमायातु न मे वृद्धिर्न च क्षतिः॥२॥ आत्मनि अनंते अविनाशरहिते महति व्यापके महांभो
धौ समुद्रे मयि जगदाख्या वीचिः स्वभावतः दृश्यत्वादिस्वभावादुदेतु वा परमस्तमायातु तदुदये वृद्धिर्नास्ति व्यापकत्वा
त्तदपगमे च क्षतिर्नास्ति अनंतत्वादित्यर्थः॥२॥ पूर्वदृष्टांतेन स्वात्मनः परिणामित्वं स्यात्तद्वारणार्थमाह॥ छ॥

मय्यनंतमहांभोधौ विश्वं नाम विकल्पना॥ अतिशांतो निराकार एतदेवाहमास्थितः॥३॥ मय्यनंतमहांभोधौ विश्वं नाम
१८ प्रसिद्धं विश्वं कल्पना भ्रममात्रमेव न तु नास्तिकं अतः कारणात् अहमतिशांतः प्रपंचोपशमरहितः॥ अत्रैव तु माह॥ निरा
कारमिति॥ एतदात्मज्ञानमेव अहमास्थितः॥ आश्रितो न तु तद्योगं तस्य पूर्वमेव दूषितत्वात्॥३॥ अतिशांतत्वमेव
स्पष्टयति॥ ७॥ नात्मा भावेषु नो भावस्तत्रानंते निरंजने॥ इत्यसक्तोऽस्पृहः शांत एतदेवाहमास्थितः॥४॥ आत्मा भावेषु
देहादिषु आद्यं तत्र यानास्ति व्यापकत्वात् नो भावो देहादिस्तत्रात्मनि नास्ति अनंते निरंजने सति इति कारणादहम्
सक्तं संसर्गरहितोऽस्पृहश्चादि धर्मासंश्लिष्टः शांत एव शांत इत्यर्थः॥४॥ इच्छादिरहितत्वे हेत्वंतरमप्याह॥ ७॥
अहो चिन्मात्रमेवाहं इंद्रजालोपमं जगत्॥ अतो मम कथं कुत्र हेयोपादेयकल्पना॥५॥ अहो इत्याश्चर्यं रूपमलौ
किकं चिन्मात्रं चैतन्यमात्रमेवाहं जगत्सर्वप्रपंचजातं इंद्रजालोपमं दर्शनकालेऽपि पृथक्सत्तारहितमसौ विश्वस्य
पृथक्सत्तारहितत्वात् मम कुत्र वस्तुनि कथं केन प्रकारेण हेयोपादेयबुद्धिः स्यात् न कुत्रापीत्यर्थः॥५॥ इत्यनुभव १८
पंचकं सप्तमं प्रकरणं॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामनुभवपंचकविवरणं सप्तमं प्रकरणं

॥७॥ ॥इत्थं परीक्षितज्ञानं शिष्यमेवाभिनंदितुं॥ गुरुर्बंधस्य मोक्षस्य अवस्थां सम्यगब्रवीत्॥१॥ तदेवं षड्भिः प्रकरणैः
स्वशिष्यं सम्यक् परीक्ष्य बंधमोक्षावस्थानिरूपणव्याजेन गुरुः स्वशिष्यानुभवमभिनंदयन् चतुर्भिः श्लोकैस्तदे
ति॥ ७॥ तदा बंधो यदा चित्तं किंचिद्वांछति शोचति॥ किंचिन्मुंचति गृह्णाति किंचिद्धृष्यति कुप्यति॥१॥ हे शिष्य अ
तो मम कथं कुत्र हेयोपादेयकल्पनेत्यंतं यत्त्वयोक्तं तत्र शेष एव यच्चित्तं विषयाकांक्षया यदा वांछादिविकारवत्तत्
देव जीवस्य बंध इत्यर्थः॥ ७॥ तदा मुक्तिर्यदा चित्तं न वांछति न शोचति॥ न मुंचति न गृह्णाति न हृष्यति न कुप्य
ति॥२॥ यदा चित्तं वांछादिविकाररहितं तदा मुक्तिरित्यर्थः॥२॥ तदेवं पृथक् बंधमोक्षावुक्तौ अथ समुच्चयेन बं
धमोक्षावाह॥ ७॥ तदा बंधो यदा चित्तं सक्तं कास्वपि दृष्टिषु॥ तदा मोक्षो यदा चित्तमसक्तं सर्वदृष्टिषु॥३॥ य
दा चित्तं कास्वपि आत्मदृष्टिषु संसक्तं तदा बंधः॥ यदा चित्तं सर्वास्वपि विषयदृष्टिषु संसक्तं न भवति तदा
मोक्ष इत्यर्थः॥३॥ अस्तु वा बाधितानुवृत्त्या सर्वापि विषयदृष्टिर्बंधहेतुस्तन्निवृत्तो मोक्ष इति पूर्वमुक्तं
तथाप्यहंकारनिवृत्तो मोक्षस्तदनिवृत्तौ बंध इति वदन्नेव शिष्योक्तमर्थमभिनंदयन्ननुवदति॥ ७॥

१८ यदा नाहं तदा मोक्षो यदाहं बंधनं तदा ॥ मत्वेति हेलया किंचिन्मा गृहाण विमुंच मा ॥ ४ ॥ यदाहमिति देहरूपः प्रथ
मोऽध्यासो नर्थमूलम्नतो निवर्त्तते तदा बंधनमिति ज्ञात्वा हेलया अनायासेनैव हानोपादानादि क्रिया मा कर्त्तत्वमभि
च कर्त्ता त्वमतानेन कर्त्तृत्वाभिमानो निवर्त्तत इति भावः ॥ ४ ॥ इत्यष्टावक्रे बंधमोक्षचतुष्टयमष्टमं ॥ इति श्रीमद्विश्वे
श्वरविरचितायामष्टावक्रटीकायां गुरुप्रोक्तं बंधमोक्षव्यवस्थाष्टमं प्रकरणं समाप्तं ॥ ॥८॥ ॥शिष्योक्तानुभवस्यैव
दार्ढ्यार्थं गुरुणोच्यते निर्वेदस्याष्टमष्टाभिः श्लोकैः आदित्यजनात्मकः ॥१॥ मत्वेति हेलया किंचिन्मा गृहाणेति यदुक्तं तत्र किं
कारणमित्यपेक्षायां गुरुर्मोदनमुद्रया वैराग्याष्टकमाह ॥ ॥ कृताकृते च द्वंद्वानि कदा शांतानि कस्य वा ॥ एवं ज्ञात्वेह नि
र्वेदाद्भव त्यागपरोऽव्रती ॥१॥ कृताकृते इदं कर्त्तव्यमिदमकर्त्तव्यमिति अभिनिवेशो द्वंद्वानि सुखदुःखादीनि कस्य कदा वा
शांतानि निवर्त्तितानि अपि तु न कस्यापि कदापि शांतानि इत्यर्थः ॥ एवं ज्ञात्वा इह कृताकृतादिषु निर्वेदादभिनिवेशाद्
परित्यागादेवं त्यागपरो भव ॥ कीदृशः सन् अव्रती ॥ नास्ति व्रतं कुत्रापि आग्रहो यस्य सः ॥१॥ चित्तधर्मत्यागरूपो निर्वेदः कस्य १८
कस्यचिदेव स्यान्न तु सर्वस्येत्याह ॥ ॥ कस्यापि तात धन्यस्य लोकचेष्टावलोकनात् ॥ जीवितेच्छा बुभुक्षा च बुभुत्सो
स्या

पशमं गताः ॥२॥ हे तात शिष्य सहस्रेषु मध्ये कस्यचिदेव धन्यस्य सोऽपि विनाशरूपलोकचेष्टावलोकनात् जीवितेच्छा
भोगेच्छा ज्ञानेच्छा इति त्रयमुपशमं गता ॥ इदं तु नाट्यं निर्वेदसंपन्नशिष्यमभिनंदितुमेवोच्यते न तु पादरूपते इति
शागुरुक्रमेव ॥२॥ न तु ज्ञानिनां सर्वेच्छोपशमः किं हेतुरित्यत आह ॥ ॥ अनित्यं सर्वमेवेदं तापत्रितयदूषितं ॥ अ
ने सारं निंदितं हेयमिति निश्चित्य शाम्यति ॥३॥ इदं दृश्यमानं सर्वं प्रपंचजातमनित्यं चैव ध्वस्तं तथाप्यपकसते न८
नगृह्यमानं मन अध्यात्मिकाधिदैविकाधिभौतिकतापत्रयदूषितं ॥ अत एवासारं तुच्छम् अत एव हेयं पृथक्सत्तयाने
वादरणीयमिति निश्चित्य ज्ञानी शाम्यति ॥ कुत्रापि इच्छां न कुरुते ॥३॥ द्वंद्वानामारब्धकर्मवशादवश्यं भावित्वात् केनेच्छा
निच्छे विहाय यथाप्राप्तभोगी मुक्तिमवाप्नुयादित्याह ॥ ॥ कोऽसौ कालो वयः किं वा यत्र द्वंद्वानि नो नृणां ॥ तान्युपेक्ष्य यथा
प्राप्तवर्त्ती सिद्धिमवाप्नुयात् ॥४॥ यत्र नृणां द्वंद्वानि सुखदुःखादीनि न संत्यसौ कः कालः का वा बाल्यादिवयो लक्षणा शरी
रावस्थापि तु न कापीति विचार्य तानि द्वंद्वान्युपेक्ष्य तत्र इच्छामनिच्छां मुक्त्वा यथाप्राप्तेष्वनियमकृत यावर्त्ति समुक्तिम
वाप्नुयादित्यर्थः ॥४॥ नहि शास्त्रादिज्ञानेषु निष्ठा न कर्त्तव्या नानाविप्रतिपत्तिग्रस्तत्वात् नापि कर्मसु नाप्यष्टांगयोगं

२० दिक्षित्याह।। छ।। नानामतंमहर्षीणांसाधूनांयोगिनांतथा।। दृष्ट्वानिर्वेदमापन्नःकोनशाम्यतिमानवः।।५।। महर्षीणां
गौतमजैमिनिप्रभृतीनांमतंनानाविधंपरिछिन्नंदृष्ट्वातर्कशास्त्रादिभ्योनिर्वेदमापन्नंतथासाधूनांकर्मनिष्ठानांम
तंनानाविधंकेचिद्धोमपराःकेचिज्जपपराः।।केचित्कृच्छ्रचान्द्रायणादिपराइतिनानाविधंदृष्ट्वाकर्मभ्योपिनिर्वेदमापन्न
स्तथायोगिनांमतंनानाविधंकेचिदष्टांगयोगपराःकेचिन्महदादितत्त्वसंख्यानपराइतिनानाविधंदृष्ट्वाष्टांगयोगादिभ्योपि
निर्वेदमापन्नःकेवलमात्मानुसंधाननिष्ठःकोनाममानवःसुखंनप्राप्नोतीत्यर्थः।।५।।केवलंज्ञाननिष्ठमेवाश्रित्यकर्मा
दिकंमाकुर्वित्याह।।छ।।कृत्वामूर्तिपरिज्ञानंचैतन्यस्यनकिंगुरुः।।निर्वेदसमतायुक्त्यायस्तारयतिसंसृतेः।।६।।निर्वेद
समतायुक्त्यानिर्वेदोनामविषयानासक्तिस्तथाशत्रुमित्रेसमतासर्वत्रात्मबुद्धियुक्तिर्नामश्रुत्यनुग्राहकस्तर्कः।।तैः
चैतन्यस्यसच्चिदानंदस्यमूर्तिपरिज्ञानंस्वरूपसाक्षात्कारंकृत्वातदनंतरंनास्तिकःसकिंगुरुर्यस्यसनकिंगुरुःएवं
विधोयःसंसृतेःसकाशादात्मानंतारयति।।६।।चैतन्यस्वरूपज्ञानोपायमाह।।छ।।पश्यभूतविकारांस्त्वंभूतमा २०
त्रान्यथार्थतः।।तत्क्षणाद्बंधनिर्मुक्तःस्वरूपस्थोभविष्यसि।।७।।देहेंद्रियादीन्भूतविकारान्देहेंद्रियादीन्यथार्थे

तस्तत्त्वतःभूतमात्रान्पश्यनतुआत्मस्वरूपान्।।एवंसतितत्क्षणाद्बंधनिर्मुक्तःसन्शरीरादिविविक्तात्मस्वरूपस्थो
भविष्यसिशरीरादावनात्मतयाज्ञातेसतितत्साक्षीभूतआत्माइतिसुज्ञेयइतिभावः।।७।।नन्वेवमात्मनि
ज्ञातेपिवृत्तंनिष्ठाकथंस्यादित्याशंक्यवासनात्यागादित्याह।।छ।।वासनाएवसंसारइतिसर्वाविमुंचताः।।तत्त्या
गोवासनात्यागात्स्थितिरद्ययथातथा।।८।।वासनाविषयवासनाएवसंसारइतिकारणात्ताःवासनास्त्वंविमुंचवासना
त्यागाच्चात्मनिष्ठायांसत्यांतस्यसंसारस्यत्यागइत्यर्थः।।अद्यअधुनावासनात्यागेसतिस्थितिर्यथातथाययाप्रारब्ध
तथैवेत्यर्थः।।८।।इतिश्रीमद्विद्वद्वरविरचितायामष्टावक्रटीकायांगुरुप्रोक्तनिर्वेदाष्टकंनवमंप्रकरणं।।९।। ।।
विषयाणामभावेपितुष्टिर्निर्वेदईरितः।।तस्मिन्धर्मार्थचविषये [illegible] वैराग्यंशांतिरीर्यते।।१।।विष
येविनापिसंतोषरूपोनिर्वेदःप्रागुक्तःअथेदानींविषयस्योपशममपिअष्टकेनगुरुराह।।छ।।विहायवैरिणंका
ममर्थंचानर्थसंकुलं।।धर्ममप्येतयोर्हेतुंसर्वत्रानादरंकुरु।।१।।कामंवैरिणंज्ञानशत्रुंविहायतथानर्थसंकुलमर्जनेरक्षणे
व्ययेवानेकशोकदुःखसंकुलमर्थंविहायतथाएतयोःकामार्थयोःअनर्थयोर्हेतुंधर्ममपिविहायसर्वत्रत्रिवर्गहेतुकर्मस्व

नादरं मुपेक्षां कुरु ॥१॥ ननु मित्रक्षेत्राफलकेषु कर्मसु कथं अनादर इत्याशंक्य मित्रादीनामनित्यत्वमाह ॥ छ ॥ स्वप्नेंद्रजाल
वत्पश्य दिनानि त्रीणि पंच वा ॥ मित्रक्षेत्रधनागारदारदायादिसंपदः ॥२॥ हे शिष्य मित्रादसंपदः स्वप्नेंद्रजालवत्पश्य यतो दि
नानि त्रीणि पंच वा स्थायिन्य इत्यर्थः ॥२॥ ॥छ॥ यत्र यत्र भवेत्तृष्णा संसारं विद्धि तत्र वै ॥ प्रौढवैराग्यमाश्रित्य वीततृष्णः सुखी भ
व ॥३॥ यत्र यत्र येषु प्रसिद्धेषु विषयेषु तृष्णा भवेत्तत्र तमेव संसारं विषयतृष्णाया एव कर्मद्वारा संसारहेतुत्वात् अतः प्रौढवैराग्यं प्रा
प्यपर्थेप्सित्यभावमास्थाय वीततृष्णः अप्राप्यर्थेच्छारहितः सन्नात्मनिष्ठ्या सुखी भवेत्यर्थः ॥३॥ अमुमेवार्थं भाषांतरेणाह
॥छ॥ तृष्णामात्रात्मको बंधस्तन्नाशो मोक्ष उच्यते ॥ भवासंसक्तिमात्रेण प्राप्तितुष्टिर्मुहुर्मुहुः ॥४॥ तृष्णामात्रस्वरूप एव बंधः
कर्मवासनाबंधहेतुत्वात् तन्नाश तृष्णानाश एव मोक्षो निरवृत्तिहेतुत्वात् ॥ तन्नाशो मोक्ष इत्यत्र हेतुमाह । भवेति ॥ भवो देहा
दिर्विषयस्तत्र देहासंगाभावमात्रेण मुहुर्मुहुः वारंवारं प्राप्तितुष्टिः ॥ आत्मप्राप्तिजः संतोषः स्यादतः तृष्णापगमे मोक्ष इ
त्यर्थः ॥ प्राप्तितुष्टिरिति पाठे प्राप्तिस्यात् तृप्तिश्च स्यादित्यर्थः ॥४॥ ननु बुभुत्सारूपा तृष्णा कथं त्याज्येत्याशंक्याह ॥ छ ॥ त्वमे
कश्चेतनः शुद्धो जडं विश्वमसत्तथा ॥ अविद्यापि न किंचित्सा का बुभुत्सा तथापि ते ॥५॥ इह जगति त्वयमेव पदार्थो आ २१

त्मा जगदविद्या च तत्र आत्मा तावत्त्वमेवैकश्चेतनः शुद्धो न तु चिद्भिन्न इति सात्मानमेवैकं पूर्णं ज्ञानी द्विनान्या पुनरात्म
बुभुत्सायुक्ता नापि जगद्बुभुत्सायुक्ता जगतः असत्त्वात् जडत्वाच्च नापि अविद्या बुभुत्सायुक्ता तस्यापि सदसद्विलक्षणरू
पतया निर्वचनीयत्वात् ॥ तथा च तव बुभुत्सापि का युक्ता न किंचदपीत्यर्थः ॥५॥ जडं विश्वमसदित्युक्तं तद्विशदयति ॥ छ ॥
राज्यं सुताः कलत्राणि शरीराणि सुखानि च ॥ संसक्तस्यापि नष्टानि तव जन्मनि जन्मनि ॥६॥ राज्यादीनि सर्वाणि संसक्तस्या
प्यासक्तिं कुर्वाणस्यापि तव जन्मनि जन्मनि नानाजन्मसु नष्टानीत्यतो विश्वमसदित्यर्थः ॥६॥ बुभुत्सापि न कर्तव्येति
प्रागुक्तमर्थं धर्मार्थकामेष्विच्छा न कार्येत्याह ॥ छ ॥ अलमर्थेन कामेन सुकृतेनापि कर्मणा ॥ एभ्यः संसारकांतारे न विश्रांत
मभून्मनः ॥७॥ अर्थादिना अलं अर्थधर्मकामेषु इच्छा न कार्येत्यर्थः ॥ अत्र हेतुमाह । एभ्य इति ॥ यतः कारणात् संसारकां
तारे संसारलक्षणे दुर्गमे वर्त्मनि भ्राम्यतस्तव एभ्यः कामार्थेभ्यः विश्रांति भ्रमणविच्छेदो नाभूदतो अर्थादिस्तान कर्त
व्येत्यर्थः ॥७॥ तृष्णाया उपशमः प्रागुक्तः अथ क्रियामात्रोपशममाह ॥ छ ॥ कृतं न कति जन्मानि कायेन मनसा गिरा ॥
दुःखमायासदं कर्म तदद्याप्युपरम्यतां ॥ ८ ॥ हे शिष्य आयासदं प्रयासदं अत एव दुःखदं कर्म कायादिना कति जन्मा

निनकृतमपितुयावदप्राप्थिनंप्राचिनसर्वत्रन्मस्वपिकृतंकर्मणातुत्वयानर्थएवलब्धस्तत्स्माद्यापिअधुना
२२ कर्मण्युपरम्यतां॥८॥इत्युपशमाष्टकं॥इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायांगुरुशिष्योक्त्युपशमद
शमंप्रकरणं॥ ॥१०॥ ॥उक्ताशांतिर्नविज्ञानंविनाकस्यापिजायते॥इतिनिश्चित्यमेवाहगुरुर्ज्ञानामृताष्ट
कं॥१॥उक्ताशांतिविज्ञानादेवस्यान्नत्वन्यथेतिबोधयितुंज्ञानाष्टकमाहतत्रादौज्ञानसाधनमाह॥७॥भावा
भावविकारश्चस्वभावादितिनिश्चयी॥निर्विकारोगतक्लेशःसुखेनैवोपशाम्यति॥१॥भावाभावरूपोविकारःस्वभा
वान्मायातत्संस्कारादेवजायते॥ननुनिर्विकारादात्मनइतिनिश्चयवान्पुरुषोनिश्चयबलादेवसुखेनानायासेनैवो
पशाम्यति॥१॥ननुमायायाजडत्वात्तत्रएवचकथंभावाभावविकारइत्याशंक्याह॥७॥ईश्वरःसर्वनिर्मातानेहा
न्यइतिनिश्चयी॥अंतर्गलितसर्वाशःशांतःक्वापिनसज्जते॥२॥ईश्वरएवसर्वनिर्मातानान्योजीवःईश्वरस्यपरव
शत्वादितिनिश्चयीपुरुषोनिश्चयवशादेवांतर्गलितसर्वाशागतसर्वस्पृहःअतएवशांतोनिश्चलचित्तःसन्क्वापि २२
नसज्जते॥२॥ननुईश्वरएवचेत्सर्वनिर्मातातर्हिकांश्चिद्दरिद्रान्कांश्चित्तुधनिनस्तथाकांश्चित्सुखिनःकांश्चि

दुःखिनोरचयतस्तस्यवैषम्यंनैर्घृण्यतामित्याशंक्याह॥७॥आपदःसंपदःकालेदैवादेवेतिनिश्चयी॥तृप्तःस्वस्थे
न्द्रियोनित्यंनवांछतिनशोचति॥३॥कालेसमयविशेषेआपदःसंपदश्चदैवात्प्राक्तनादृष्टादेवेश्वरपरिपाचिता
देवेतिनिश्चयीअतएवतृप्तोवीतस्पृहःअतएवनित्यंस्वस्थेन्द्रियोविषयानाकृष्टेन्द्रियअप्राप्तंनवांछतिनशो
चतीत्यर्थः॥३॥ननुउक्तनिश्चयवानपिकर्माणिकुर्वन्नेवदृश्यतइत्याशंक्याह॥७॥सुखदुःखेजन्ममृत्युदै
वादेवेतिनिश्चयी॥साध्यादर्शीनिरायासःकुर्वन्नपिनलिप्यते॥४॥कर्मफलभूतेसुखादिकेदैवादृष्टा
देवइतिनिश्चयीअतएवमयाइदंफलंसाध्यमित्यदर्शीअतएवनिरायासःश्रमरहितःप्रारब्धवशात्कुर्वन्नपि
नलिप्यते॥कर्मजानर्थभागीनभवतिकर्तृत्वाध्यासरहितत्वादित्यर्थः॥४॥ननुकुर्वन्कथंनिरायासइत्याशंक्याह॥ मइसा४
७॥चिंतयाजायतेदुःखंनान्यथेहेतिनिश्चयी॥तयाहीनःसुखीशांतःसर्वत्रगलितस्पृहः॥५॥इहदुःखंचिंत
याजायतेनान्यथेतिनिश्चयीअतएवचतयाचिंतयाहीनःअतएवशांतःस्थिरांतःकरणःअतएवसर्वत्रसुख
तत्साधनयोर्गलितस्पृहः॥पुरुषःसुखीभवतीत्यर्थः॥५॥उक्तसाधनैःसिद्धज्ञानिनांदशांनिरूपयति॥७॥

२३ नाहं देहो न मे देहो बोधोऽहमिति निश्चयी ॥ कैवल्यमिव संप्राप्तो न स्मरत्यकृतं कृतं ॥६॥ अहं देहो न तथा मे देहो अ०टी०
न किंतु नित्यबोधोऽहमिति ॥ ज्ञानवशात् देहादौ निवृत्ताहंममाभिमानः देहादिना कृतमकृतं च मया कृतमिति न स्म निमा २
रति ॥ यथा कैवल्यंप्राप्तः कृताकृतं न स्मरति तद्वदित्यर्थः ॥६॥ आब्रह्मस्तंबपर्यंतमहमेवेति निश्चयी ॥ निर्विक
ल्पः शुचिः शांतः प्राप्ताप्राप्तविनिर्वृतः ॥७॥ ब्रह्माणं हिरण्यगर्भमारभ्य तृणस्तंबपर्यंतं सर्वं जगदहमेवेति
प्रत्यक्षरनिश्चयवाननुरूपः निर्विकल्पः संकल्पविकल्पशून्यः ॥ अत एव शुचिर्विषयासंगरूपमलरहितः अ
त एव शांतो निश्चलांतःकरणः अत एव प्राप्ताप्राप्तयोरपि विषययोर्निर्वृतः परमसंतोषवान् आत्मानंदपूर्णत्वा
दित्यर्थः ॥७॥ नन्वात्मज्ञानी कथं निर्विकल्पादिरूप इत्याशंक्याह ॥८॥ नानाश्चर्यमिदं विश्वं न किंचिदिति निश्च
यी ॥ निर्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति ॥८॥ अधिष्ठानतत्त्वसाक्षात्कारेण अस्मद्बोधे सति नानाश्च
र्यमयं विश्वं जगन्न किंचित्पृथक्सत्ताशून्यमिति निश्चयवाननुरूपः निवृत्तवासनः केवलचिद्रूपः सन् न किंचि २३
दिव विशेषव्यवहारागोचर एव शाम्यति ॥ निवृत्तकार्यकारणोपाधिर्भवति ॥ तत्त्वज्ञानेन सर्वस्यापि स्वप्नवन्नि

वृत्तेरित्यर्थः ॥८॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां ज्ञानाष्टकमेकादशं प्रकरणं ॥११॥ ॥
गुरुणोदीरितं ज्ञानं न किंचिदवशाम्यति ॥ नत्वस्मिन्नप्यभिख्यातुं शिष्यो वदति सांप्रतं ॥१॥ उक्तं ज्ञानाष्टकेन
न किंचिदवशाम्यतीति तदेव शिष्यः स्वस्मिन् विशदयितुमेवमेवाष्टकमाह ॥ तत्र प्रथमं कायवाङ्मनसां व्या
पारोपरममाह ॥ कायकृत्यासहः पूर्वं ततो वाग्विस्तरासहः ॥ अथ चिंतासहस्तस्मादेवमेवाहमास्थितः ॥
१॥ अहं पूर्वं अपि कायकरूपकर्मासहस्ततो हेतोर्वाग्विस्तरासहः जपकर्मासहः अथातो मनोव्यापाररू
पाया चिंतायास्तत्र असहस्तस्माद्धेतोः एवमेव निर्व्यापार एवाहमास्थितः आसमस्येवास्थित इत्यर्थः ॥१॥ उक्तं व्या
पारत्रयोपरमहेतुं वदन्नेवोक्तमनुवदति ॥१॥ प्रीत्यभावेन शब्दादेरदृश्यत्वेन चात्मनः ॥ विक्षेपैकाग्रहृदय
एवमेवाहमास्थितः ॥२॥ दायिसुफलजनकस्य शब्दादेः शब्दकायकर्मद्वयस्य प्रीत्यभावेन प्रीत्यविषयत्वेन
आत्मनश्चादृश्यत्वेन निखिलविधविक्षेपे मोक्षार्थे नं एकाग्रहृदयं यस्य स विक्षेपैकाग्रहृदय इति मध्यमपदलोपी
समासः ॥ दायिसुफलजनकस्य जपादेः प्रीत्यविषयत्वात् जपादिरूपो विक्षेपो न ममास्ति आत्मनश्चादृश्यत्वा

२४ घनाद्यविषयत्वाच्चिंतारूपोपि विक्षेपो मे मास्तीत्यर्थः ॥ अत एवमेव स्वस्वरूपेणैव अहमास्थितः ॥२॥ ननु त
नेत्रा द्यापि समाध्यर्थं व्यवहारकर्तृत्वमस्तीत्याशंक्याह ॥ ७॥ समाध्यासादिविक्षिप्तौ व्यवहारः समाधये ॥ एवं विलोक्य
नियममेवमेवाहमास्थितः ॥३॥ कर्तृत्वभोक्तृत्वादि अनर्थाध्यासादिर्निर्विक्षिप्तौ सत्यां तन्निरासार्थं समाध
ये व्यवहारो नान्यथेति नियमं विलोक्य शुद्धात्मज्ञानी नियमाद्यध्यासाभावादेवमेव समाधिशून्य एवाहमास्थि
त इत्यर्थः ॥३॥ हेयोपादेयविरहादेवं हर्षविषादयोः ॥ अभावादद्य हे ब्रह्मन्नेवमेवाहमास्थितः ॥४॥ पूर्णात्म
दर्शिनो मम हेयोपादेयवस्तुनो विरहात् अत एवममुनाप्रकारेण हर्षविषादयोरप्यभावाद्धे ब्रह्मन् गुरो अद्य
अधुनाहमेवमेवास्थित इत्यर्थः ॥४॥ आश्रमानाश्रमध्यानं चित्तस्वीकृतवर्जनात् ॥ विकल्पं मम वीक्ष्यैतै
वमेवाहमास्थितः ॥५॥ आश्रमानाश्रमध्यानं च तथा तत्स्वीकं किंचित्स्वकृतं चित्तवर्जनं च एतैस्त्रिभिरेव मम ३३
विकल्पं संकल्पविकल्पं वीक्ष्य अहमेवमेव एतन्न्यायरहित एवास्थितः ॥५॥ कर्मानुष्ठानमज्ञानाद्यथै २४
वोपरमस्तथा ॥ बुध्वा सम्यगिदं तत्त्वमेवमेवाहमास्थितः ॥६॥ यथैव कर्मानुष्ठानमज्ञानात्तथैवोपरमः क

र्मोपरमोप्यज्ञानादेव इदं सम्यक् यथार्थतो बुद्ध्वाहमेवमेव कर्मतदुपरमरहित एवाहमास्थितः ॥६॥ अचिंत्यं
चिंत्यमानोपि चिंत्यरूपं भजत्यसौ ॥ त्यक्त्वा तद्भावनं तस्मादेवमेवाहमास्थितः ॥७॥ अचिंत्यं ब्रह्मेति चिंत्यमानो
प्यसावात्मचिंतालक्षणरूपं ॥ तस्माद्धेतोः तद्भावनमचिंत्यं ब्रह्मेति भावनं त्यक्त्वा अहमेवमेव भावनारहित ए
वास्थितः ॥७॥ एवमेवेत्यवस्थायाः साधकोपि श्रेष्ठः किंपुनस्तत्स्वभाव इति कैमुतिकन्यायेनाह ॥ ७॥ एवमेव
कृतं येन स कृतार्थो भवेदसौ ॥ एवमेव स्वभावो यः स कृतार्थो भवेदसौ ॥ ८॥ येन एवमेव सर्वक्रियारहितमेव
स्वरूपं साधनवशात्कृतं सोसौ कृतार्थो भवेत् ॥ यस्तु एवमेव स्वभाववान् सोसौ कृतार्थो भवतीति ॥ किं व-
क्तव्यमित्यर्थः ॥ ८॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामेवमेवाष्टकं द्वादशकं प्रकरणं ॥
१२॥ एवमेवेत्यवस्थायाः फलीभूतां सुखस्थितिं ॥ प्राह शिष्यः स्फुटीकर्तुमहमासे यथासुखं ॥१॥ अथैव
मेवेत्यवस्थायाः फलीभूतां सुखावस्थां स्वकीयां विशदयितुमाह ॥ ७॥ अकिंचनभवं स्वास्थ्यं कौपीन
त्वेपि दुर्लभं ॥ त्यागादाने विहायास्मादहमासे यथासुखं ॥१॥ अकिंचनभवं सर्वसंगाभावप्रभवं स्वास्थ्यं

२५ चित्तस्थैर्यं कौपीनत्वेपि कौपीनमात्रावपि दुर्लभं ॥ अस्मात्कारणादहं त्यागादाने विहाय त्यागादानयोरा
सक्तिं विहाय यथासुखं सुखमनतिक्रम्याहमासे न कदाचिद्दुःखीत्यर्थः ॥१॥ कुत्रापि खेदः कायस्य जिह्वा कुत्रा
पि खिद्यति ॥ मनः कुत्रापि तत्त्यक्त्वा पुरुषार्थे स्थितः सुखं ॥२॥ कुत्रापि शरीरकर्मणि कायस्य खेदः कुत्रापि वाचिकर्म
णि जिह्वा खिद्यते कुत्रापि ध्यानादिकर्मणि मनः खिद्यति अतोहं तत्त्रयमपि त्यक्त्वा सुखं यथास्यात्तथा पुरुषार्थे स्वा
त्मन्येव स्थितः ॥२॥ ननु कायवाङ्मनोव्यापारत्यागे देहएव न स्थापते भोजनांबुपानादेरपि त्यागादित्याशंक्याह ॥७॥
कृतं किमपि नैव स्यादिति संचिंत्य तत्त्वतः ॥ यदा यत्कर्तुमायाति तत्कृत्वासे यथासुखं ॥३॥ शरीरेंद्रियादिभिः कृतं किम
पि तत्त्वतः आत्मकृतं न स्यादिति संचिंत्य यदा यच्छरीरादिकर्म कर्तुमायाति तदहंकारशून्यतेन कृत्वा अहं यथासु
खमासे ॥३॥ ननु कर्मनैष्कर्म्यं वा एकत्र निष्ठावश्यं स्वीकार्या पुरुषार्थिभिरित्याशंक्याह ॥७॥ कर्मनैष्कर्म्यनिर्बंधभा
वा देहस्थयोगिनः ॥ संयोगायोगविरहादहमासे यथासुखं ॥४॥ कर्मनैष्कर्म्यनिर्बंधरूपा भावास्तु भावा देहस्थयो २५
गिनः ॥ देहासक्तयोगिन एव अहं तु देहसंयोगवियोगविरहादपि यथासुखमासे तथा मम देहाद्यसंयोगाभावान्न कर्म

नैष्कर्म्यनिर्बंधइत्यर्थः ॥४॥ अथ लौकिकव्यापारेपि मम न निर्बंध इत्याह ॥७॥ अर्थानर्थौ न मे स्थित्या गत्या न शयने
न वा ॥ तिष्ठन्गच्छन्स्वपन्तस्मादहमासे यथासुखं ॥५॥ मम स्थित्यादिना साध्यो अर्थानर्थौ न स्तः पूर्णानंदात्म
दर्शित्वात् तस्मादनासक्त्या तिष्ठन्गच्छन्स्वपन्वाहं यथासुखमासे ॥५॥ एतदेव भंग्यंतरेणाह ॥७॥ स्वपतो नास्ति
मे हानिः सिद्धिर्यत्नवतो न वा ॥ नाशोल्लासौ विहायास्मादहमासे यथासुखं ॥६॥ स्वपतो यत्नरहितस्य मे मम हानिर्ना
स्ति यत्नवतश्च वा मम सिद्धिः फलविशेषप्राप्तिर्नास्ति ॥ अस्मात्कारणाद्यत्नायत्नयोर्नाशोल्लासौ विहायाहं यथा
सुखमासे ॥६॥ सुखादिरूपानियमं भावेष्वालोक्य भूरिशः ॥ शुभाशुभे विहायास्मादहमासे यथासुखं ॥७॥
भावेषु वस्तुषु सुखादिरूपानियमं सुखादिधर्माणामनित्यत्वं भूरिशो बहुषु स्थलेष्वालोक्य तस्मात्सुखाद्य
नित्यत्वदर्शनाद्धेतोरहं यथासुखमासे ॥७॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां यथासुखस
प्तकं त्रयोदशं प्रकरणं ॥१३॥ उदीरितां सुखावस्थां समर्थयितुमात्मनि ॥ प्राह शिष्यः शमावस्थां चतुःश्लो
क्या गुरुं प्रति ॥१॥ पूर्वं तु गुरुणोपशमाष्टकमुक्तं संप्रति तु शिष्यः स्वसुखावस्थामर्थनार्थमात्मनः शम

दस्थामाह॥ छ॥ प्रकृत्या शून्यचित्तो यः प्रमादाद्भावभावनः॥ निद्रितो बोधित इव क्षीणसंस्मरणो हि सः॥१॥
प्रकृत्या स्वभावेन विषयेषु शून्यचित्तः प्रमादात्पूर्वकर्मारब्धवशाद्भावान्विषयान् भावयति चिंतयतीति
भावभावनः॥ क इव निद्रितो बोधित इव यथा निद्रावशाच्छून्यचित्तः केनचिद्बोधितस्तत्प्रमादाद्भावभा
वन एवंविधो यः पुमान् विषयेषु शांतचित्तः स हि निश्चितं क्षीणसंसरणः संसारहेतुविषयानुस्मरणभावादि
त्यर्थः॥१॥ क्व धनानि क्व मित्राणि क्व मे विषयदस्यवः॥ क्व शास्त्रं क्व च विज्ञानं यदा मे गलिता स्पृहा॥२॥ विषयभा
वनाशून्यस्य पूर्णात्मदर्शिनो मे यदा स्पृहा विषयेच्छा गलिता तदा मे मम क्व धनानि क्व विषयरूपा दस्यवश्चौ
राः॥ क्व शास्त्रं च क्व विज्ञानमहं ब्रह्मास्मीति निदिध्यासनं च क्व धनादिविज्ञानांतेष्वपि ममावस्था नास्तीत्यर्थः॥
२॥ विज्ञाते साक्षिपुरुषे परमात्मनि चेश्वरे॥ नैराश्ये बंधमोक्षे च न चिंता मुक्तये मम॥३॥ देहेंद्रियादीनां सा
क्षिपुरुषे त्वंपदार्थे परमात्मनि चेश्वरे तत्पदार्थे विज्ञाते ब्रह्माहमस्मीति साक्षात्कृते मतिनिर्मुक्ते चिद्रूपा २६
त्मतानुभावाद्बंधमोक्षेपि नैराश्ये सति मम मुक्त्यर्थं न चिंता॥३॥ ननु प्रमादाद्भावभावकः कथं शांत इत्याशंक्या

ह॥ छ॥ अंतर्विकल्पशून्यस्य बहिः स्वच्छंदचारिणः॥ भ्रांतस्येव दशास्तास्तास्तादृशा एव जानते॥४॥ अंतःकरणे
विकल्पशून्यस्य बहिः भ्रांतस्येव स्वच्छंदचारिणः ज्ञानिनो दशास्ता दृशा एव ज्ञानिन एव जानते॥४॥ इति शां
तिचतुष्कं चतुर्दशमं प्रकरणं॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां शिष्यप्रोक्तं शांतिचतु
ष्टयं चतुर्दशमं प्रकरणं॥१४॥ दुर्लक्ष्यमात्मनस्तत्त्वं प्रत्यापयितुमंजसा॥ मुक्तस्तत्त्वोपदेशोयं गुरुराह दयो
दधिः॥१॥ यद्यपि प्रथममात्मतत्त्वोपदेशः कृत एव तथापि तदात्मतत्त्वमंतेवासिभ्यः पुनःपुनरुपदेष्टव्यं दुर्ल
क्ष्यत्वात्॥ यथा छांदोग्योपनिषदि नवकृत्वः श्वेतकेतुं प्रति वारंवारं शिक्षार्थमसकृदात्मोपदेशं गुरुराह॥ तत्रादौ
ज्ञानाधिकारिणमनधिकारिणं चाह॥ छ॥ यथातथोपदेशेन कृतार्थः सत्त्वबुद्धिमान्॥ आजीवमपि जिज्ञासुः पर
स्तत्र विमुह्यति॥१॥ सत्त्वबुद्धिमान् शिष्यो यथातथा आपाततोऽप्युपदेशेन कृतार्थः स्यात् अत एव कृतयुगे प्रणवमा
त्रोपदेशादपि शिष्याः कृतार्थाः बभूवुः॥ परः असत्त्वबुद्धिः यावज्जीवं जिज्ञासुरपि बहुधोपदिष्टोऽपि विमुह्यति॥ यथा विरो
चनो ब्रह्मणा बहुधोपदिष्टोऽपि मुमोहेवेत्यर्थः॥१॥ अथ बंधमोक्षौ सुखोपायेन संग्रहेण निरूपयति॥ छ॥ मोक्षो वि

षयवैरस्यं बंधो वैषयिको रसः॥ एतावदेव विज्ञानं यथेच्छसि तथा कुरु॥२॥ विषयेष्वनुरागाभाव एव मोक्षः॥ विषयेष्वा
नुरागस्तु बंध इत्यर्थः॥ एवं तावदेव बंधमोक्षयोः स्वरूपं तदुद्दिष्टं ज्ञानं॥ एवं ज्ञात्वा त्वं यथेच्छसि तथा कुरु॥२॥ इदं तु
विषयवैरस्यं तत्त्वबोधस्य साध्यमित्याह॥ छ॥ वाग्मिप्राज्ञमहोद्योगं जनं मूकं जडालसं॥ करोति तत्त्वबोधोऽयमतस्त्य
स्वयंप्रसिद्धं ४ क्तो बुभुक्षुभिः॥३॥ आत्मतत्त्वबोधः वाग्मिनं वक्तृचतुरवाक्यभाषिणं मूकं करोति॥ प्राज्ञं नानाविशेषवेदिनं ज
नं जडं करोति॥ महोद्योगं नानाक्रियानुष्ठानशालिनमलसं निष्क्रियं करोति॥ मनसः प्रत्यक्प्रवणत्वतया वागा
दयः कुंठिता भवंतीति ज्ञाहृतो भवतीत्यर्थः॥ यतोऽयं तत्त्वबोधः वागादीन् कुंठितान् करोति अतो भोगेच्छाभिस्त्यक्तः
अनादृत इत्यर्थः॥३॥ तत्त्वबोधस्वरूपमुपदिशति॥ छ॥ न त्वं देहो न ते देहो भोक्ता कर्त्ता न वा भवान्॥ चिद्रूपोऽसि
सदा साक्षी निरपेक्षः सुखं चर॥४॥ त्वं देहादिरूपो न भवसि यतश्चिद्रूपोऽसि न ते तव देहसंबंधः॥ असंगो ह्ययं पुरु
ष इति श्रुतेः॥ न वा भवान् कर्त्ता भोक्ता यतः कर्तृभोक्तृप्रभृतीनां साक्षी॥ यो यत्साक्षी स तद्भिन्नः॥ यथा घटा २७
दिरित्यर्थः॥ अतस्त्वं देहतत्संबंधानपेक्षः सन् सुखं चरेत्यर्थः॥४॥ निरपेक्षत्वमुपपादयितुमाह॥ छ॥ रागद्वेषौ म

नोधर्मौ न मनस्ते कदाचन॥ निर्विकल्पोऽसि बोधात्मा निर्विकारः सुखं चर॥५॥ रागद्वेषौ तु मनोधर्मौ न तु तव धर्मौ म
नस्तु कदाचिदपि तव संबंधि न भवति अतस्तद्धर्मा रागाद्या धर्मा मा कुर्वित्यर्थः॥ ननु रागद्वेषौ मम धर्मौ कथं
न इत्याशंक्याह॥ निर्विकल्पोऽसीति॥ यतस्त्वं निर्विकल्पः बोधात्मा चासि अतो रागादिविकाररहितः सन् सुखं चरेत्य
र्थः॥५॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥ विज्ञाय निरहंकारो निर्ममस्त्वं सुखी भव॥६॥ सर्वभूतेषु का
रणत्वेनानुस्यूतमात्मानं विज्ञाय विभाव्य सर्वभूतानि चात्मनि अध्यस्तानीति विभाव्य अहंकारादेतत्सर्वस्या
त्मत्वेनैव स्फुरणात् अहंममाभिमानरहितस्त्वं सुखी भव॥६॥ सर्वभूतानि चात्मनीत्येतद्विशदयति॥ छ॥ विश्वं
स्फुरति यत्रेदं तरंगा इव सागरे॥ तत्त्वमेव न संदेहश्चिन्मूर्ते विज्वरो भव॥७॥ यदिदं विश्वं सागरे तरंगा इवाधिष्ठाना
भिन्नं तच्चैतन्यं त्वमेव अतः कारणात् हे चिन्मूर्ते त्वं विज्वरो भव चिन्मात्रोऽहमित्यनुभवान्निवृत्तसर्वसंता
अधिको पो भवेत्यर्थः॥७॥ परमकारुणिकतया पुनः पुनः बोधयति॥ छ॥ श्रद्धत्स्व तात श्रद्धत्स्व नात्र मोहं कुरुष्व भोः॥ ज्ञा
नस्वरूपो भगवानात्मा त्वं प्रकृतेः परः॥८॥ श्रद्धत्स्व तात श्रद्धत्स्व अतश्चिद्रूपतायामसंभावनाविपरीतभावना

२८ रूपं मोहं मौढ्यमविवेकं मा कुरुष्व मा कार्षीरित्यर्थः॥ मा कुरुष्वेत्यत्रैव तु कं विशदयति॥ ज्ञानेति॥ ज्ञानस्वरूपः प्रज्ञ
नेः परस्त्वं कीदृशस्त्वं भगवान् तत्पदार्थः॥ तथा आत्मा त्वंपदार्थः॥ ९॥ गुणैः संवेष्टितो देहस्तिष्ठत्यायाति या
ति च॥ आत्मा न गंता नागंता किमेनमनुशोचसि॥ १०॥ गुणैरिंद्रियादिभिः संवेष्टितो देहोऽयं लोके तिष्ठति
तथा किंचित्कालं याति च गच्छति तिष्ठति देहादिभिन्न आत्मा तु न गंता नाप्यगंता तोऽहं तां हं मरिष्यामीत्येव
मेनं किं शोचसि देहधर्मैरात्मानं मा शोचेत्यर्थः॥ १०॥ नापि देहस्थित्युत्क्रांतिभ्यां तव वृद्धिहानी इत्याह॥ ७॥ देहस्तिष्ठ
तु कल्पांतं गच्छत्वद्यैव वा पुनः॥ क्व वृद्धिः क्व च वा हानिस्तव चिन्मात्ररूपिणः॥ ११॥ नित्यचिन्मात्ररूपिणस्तव देह
स्थित्या न वृद्धिः न वा देहनिर्गमात् हानिरित्यर्थः॥ ११॥ त्वय्यनंतमहांभोधौ विश्ववीचिः स्वभावतः॥ उदेतु वास्तमाया
तु न ते वृद्धिर्न वा क्षतिः॥ १२॥ विश्वाख्या वीचिरपि स्वभावतः अविद्याकामकर्मतः त्वय्यनंतचित्समुद्रे उदेतु अथवा
अस्तमायातु तावतापि ते न तव न वृद्धिर्न वा क्षतिः॥ नवानंतत्वादित्यर्थः॥ १२॥ तात चिन्मात्ररूपोऽसि न ते भिन्न २८
मिदं जगत्॥ अतः कस्य कथं कुत्र हेयोपादेयकल्पना॥ १३॥ सर्वस्मात्तव भिन्नत्वात् किं हेयमुपादेयमित्यर्थः॥ १३॥

एकस्मिन्नव्यये शांते चिदाकाशेऽमले त्वयि। कुतो जन्म कुतः कर्म कुतोऽहंकार एव च॥ १४॥ एकस्मिन् सजातीयवि
जातीयस्वगतभेदशून्ये अव्यये शांते च कार्यशून्ये चिदाकाशे निर्मले च सर्वोपाधिशून्ये च त्वयि कुतो जन्म कुत
श्चाहंकारादितीयस्य हेतोरभावात्॥ अव्ययत्वाज्जन्मासंभवात्॥ कार्यशून्यस्य च कर्मकर्तृत्वासंभवान्निर्मल
स्य चाहंकारासंभवादित्यर्थः॥ १४॥ एकत्वमुपपादयति॥ ७॥ यत्त्वं पश्यसि तत्रैकस्त्वमेव प्रतिभाससे॥ किं पृथग्भा
सते स्वर्णात्कटकांगदनूपुरं॥ १५॥ यद्यत्कार्यं त्वं पश्यसि तत्र कारणरूपस्त्वमेवैकः प्रतिभाससे कटकांगदादे
स्वर्णवदित्यर्थः॥ १५॥ अयं सोऽहमयं नाहं विभागमिति संत्यज॥ सर्वमात्मेति निश्चित्य निःसंकल्पः सुखी भव॥
१६॥ कारणरूपात्मैव सर्वमिति निश्चित्य भेदभ्रमं त्यज॥ तथा च निर्विकल्पो विगतनानाप्रतिभासः सन् सुखी भ
व द्वितीयप्रतीतौ भानादिदुःखं भवतीत्यर्थः॥ १६॥ विभागत्यागे युक्तिमाह॥ ७॥ तवैवाज्ञानतो विश्वं त्वमे
कः परमार्थतः॥ त्वत्तोऽन्यो नास्ति संसारी नासंसारी च कश्चन॥ १७॥ तवैवाज्ञानतो विश्वं मिथ्याकारो विक्षेपः॥
अतः परमार्थतस्त्वमेकः अतः संसार्यसंसारी च त्वत्तोऽन्यः कश्चिदित्यर्थः॥ १७॥ भ्रांतिमात्रमिदं विश्वं न

अ०टी०

२८ किंचिदिति निश्चयी ॥ निर्वासनः स्फूर्त्तिमात्रो न किंचिदेव शाम्यति ॥ १७ ॥ इदं विश्वं भ्रांतिमात्रं सिद्धं ॥ अतो हे
तोर्न किंचित्पृथक्सत्तारहितमित्यर्थः ॥ इति निश्चयी अत एव सर्वस्य निरस्तत्वान्निर्वासनः स्फूर्त्तिमात्रः
सन्न किंचिदिव निरस्ताशेषविशेषः सन् शाम्यति ॥ १७ ॥ एक एव भवांभोधावासीदस्ति भविष्यति ॥ न ते बं
धोऽस्ति मोक्षो वा कृतकृत्यः सुखं चर ॥ १८ ॥ कालत्रयेपि भवांभोधौ एकस्त्वमेव ॥ अतस्तव बंधमोक्षौ न स्तः अतः
त्वं कृतकृत्यः सन् सुखं चर ॥ १८ ॥ मा संकल्पविकल्पाभ्यां चित्तं क्षोभय चिन्मय ॥ उपशाम्य सुखं तिष्ठ स्वात्मन्या
नंदविग्रहे ॥ १९ ॥ हे चिन्मय त्वं संकल्पविकल्पाभ्यां चित्तं मा क्षोभय उपशाम्य उपरतसंकल्पविकल्पो भव आ
नंदरूपे स्वात्मनि सुखं तिष्ठ ॥ १९ ॥ ध्यानमपि त्यजेत्याह ॥छ॥ त्यजैव ध्यानं सर्वत्र मा किंचित् हृदि धारय ॥
आत्मा त्वं मुक्त एवासि किं विमृश्य करिष्यसि ॥ २० ॥ सर्वत्र ध्यानं त्यज कुत्रापि ध्यानं मा कार्षीरित्यर्थः ॥ एतदेव
विशदयति ॥ मा किंचित् हृदि धारयेति ॥ मननमपि त्यजेत्याह ॥ आत्मेति ॥ आत्मा त्वं सदा मुक्त एवासि ॥ अ २८
तो विमृश्य विचार्य किं फलं करिष्यसि नित्यमुक्तत्वादित्यर्थः ॥ २० ॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्र

टीकायां तत्त्वोपदेशविंशतिकं पंचदशमं प्रकरणं ॥ १५ ॥ पृथक्त्वेन सर्वस्य विस्मृतिर्मुक्तिसाधनं ॥ तस्याद्यनर्थ
विच्छेदद्वारेणोत्पत्त्यवर्ण्यते ॥ १ ॥ तत्त्वज्ञानेन सर्वप्रपंचस्य पृथक्त्वेन या विस्मरणं कारणोस्त्वव तस्यापायादिद्वारा मुक्ति
र्नोन्यथेति विशेषमुपदिशति ॥छ॥ आचक्ष्व शृणु वा तात नानाशास्त्राण्यनेकशः ॥ तथापि न तव स्वास्थ्यं सर्वविस्म
रणादृते ॥ १ ॥ हे तात त्वं नानाशास्त्राणि अनेकशः अनेकवारं शिष्येभ्यः आचक्ष्व गुरुभ्यः शृणु वा तथापि तव सर्ववि
स्मरणादृते स्वास्थ्यं श्रेयो नास्तीत्यर्थः ॥ ननु सुषुप्तौ सर्वविस्मरणं सर्वेषां विद्यत एव तेन सर्वेषां मोक्षः स्यादित्यर्थं तद
र्थं संन्यासादि ॥ सत्यं सुषुप्तौ तु यद्यपि विषयविस्मरणमस्ति तथाप्यज्ञानविस्मरणं नास्तीति भावः ॥ जीवन्मुक्तस्य
तु अज्ञानादेः सर्वस्याध्यस्तानुतुसं ध्यानरूपं विस्मरणमस्तीति भावः ॥ १ ॥ सर्वविस्मरणे सति स्वस्वरूपमुपविश्य चित्तं
निरस्तसर्वाशं भवतीति सूचयन्नाह ॥छ॥ भोगं कर्म समाधिं वा कुरु विज्ञ तथापि ते ॥ चित्तं निरस्तसर्वाशमत्यर्थं
रोचयिष्यति ॥ २ ॥ हे विज्ञ त्वं भोगं कुरु कर्म वा कुरु समाधिं वा कुरु तथापि चित्तं सर्वमत्यर्थं रोचयिष्यति रुचिमु
त्पादयिष्यति ॥ कीदृशं चित्तं निरस्तसर्वाशं सर्वविस्मरणे सति सर्वाशानुदयादित्यर्थः ॥ २ ॥ सर्वदृश्यविलये सति

३० तु कृतेनापि कर्मणा दुःखहेतुरायासो न भवतीति सूचयन्नाह ॥ छ ॥ आयासात्सकलो दुःखी नैनं जानाति कश्चन
अनेनैवोपदेशेन धन्यः प्राप्नोति निर्वृतिं ॥ ३ ॥ सकलो जन आयासादेव दुःखी वर्तते परं तु कश्चन एनमायासं न जा
नाति दुःखहेतुरयमिति न वेत्ति ॥ अनेनेति ॥ आयासात्सकलो दुःखी त्यनेनैवोपदेशेन धन्यः सुकृती निर्वृतिं पर
मसुखं प्राप्नोति ॥ ३ ॥ व्यापारेनासक्तः सुखहेतुरित्याह ॥ छ ॥ व्यापारे खिद्यते यस्तु निमेषोन्मेषयोरपि ॥ तस्याल
स्यधुरीणस्य सुखं नान्यस्य कस्यचित् ॥ ४ ॥ यो निमेषोन्मेषयोरपि व्यापारे खिद्यते अनासक्तो भवति तस्यालस्य
धुरीणस्य क्रियाभिनिवेशरहितस्य सुखं नान्यस्य क्रियाभिनिवेशयुक्तस्य ॥ ४ ॥ सर्वस्माद्विलक्षण इति द्वंद्वहानि
रपि भवतीति सूचयन्नाह ॥ छ ॥ इदं कृतमिदं नेति द्वंद्वैर्मुक्तं यदा मनः ॥ धर्मार्थकाममोक्षेषु निरपेक्षं तदा भवे
त् ॥ ५ ॥ इदं कृतमिदं नेत्यादिद्वंद्वैर्मुक्तं यदा मनो भवति तदा पुरुषार्थचतुष्टयेपि निरपेक्षं भवेद्द्वंद्वातीतस्य जी
वन्मुक्तत्वादित्यर्थः ॥ ५ ॥ पुरुषार्थकामनापि निरपेक्षस्तु विरक्तकामुकाभ्यां विलक्षण इत्याह ॥ छ ॥ विरक्तो वि २०
षयद्वेष्टा रागी विषयलोलुपः ॥ ग्रहमोक्षविहीनस्तु न विरक्तो न रागवान् ॥ ६ ॥ मुमुक्षुः सन्यो विषयद्वेष्टा स विरक्त क

थ्यते ॥ कामनासापेक्षः सन्यो विषयलोलुपः स रागीति कथ्यते ॥ यस्तु ग्रहमोक्षविहीनः ग्रहमोक्षाभ्यां विहीनः स वि
रक्तसुरक्ताभ्यां विलक्षणः सर्वतो निरपेक्षतया हानोपादानेच्छारहितत्वादित्यर्थः ॥ ६ ॥ न तु ज्ञानिनोपि हानोपादाना
दिव्यवहारो दृश्यते इत्यत आह ॥ छ ॥ हेयोपादेयता तावत्संसारविटपांकुरः ॥ स्पृहा जीवति यावद्वै निर्विचारदशास्प
दं ॥ ७ ॥ निर्विचारदशास्पदमविवेकदशामयी भूता स्पृहा तृष्णा यावज्जीवति तावत्पर्यन्तमेव हेयोपादेयता हेयो
पादानादिव्यवहारः संसारवृक्षस्य शाखांकुरो भवति ॥ ज्ञानिनां तु स्पृहाभावात्तस्यापि हानोपादानादिव्यवहा
रे संसारशाखाप्रसक्तो न भवतीत्यर्थः ॥ ७ ॥ प्रवृत्तौ जायते रागो निवृत्तौ द्वेष एव हि ॥ निर्द्वंद्वो बालवद्धीमानेव
मेव व्यवस्थितः ॥ ८ ॥ प्रवृत्तौ सरागप्रवृत्तौ सत्यामुत्तरोत्तरं विषयेषु रागो जायते ॥ विषयोपेद्वेषपूर्वकनिवृ
त्तौ सत्यामुत्तरोत्तरं विषयेषु द्वेष एव हि जायते ॥ अतो धीमान् ज्ञानी बालवत्प्राप्ताप्राप्तानुसंधानरहितः
निर्द्वंद्वः रागद्वेषविहीनः सन्नेव रागजनितप्रवृत्तिद्वेषजनितनिवृत्तिरहित एव स्थितः ॥ केवलमारब्धवशादेव क
दाचित्प्रवर्तते कदाचिन्निवर्तते च न तु रागद्वेषवशादित्यर्थः ॥ ८ ॥ हातुमिच्छति संसारं रागी दुःखजि

हासया॥ वीतरागो हि निर्दुःखस्तस्मिन्नपि न खिद्यति॥९॥ यस्तु रागी स दुःखं जिहासया संसारं हातुमिच्छति॥ वीतरा
गस्तु निर्दुःखरागोऽत्यदुःखरहितत्वात्तस्मिन्संसारे सत्यपि न खिद्यति खेदं न प्राप्नोति॥९॥ यस्याभिमानो मोक्षेऽपि देहे
ऽपि ममता तथा॥ न च ज्ञानी न वा योगी केवलं दुःखभागसौ॥१०॥ अहं ज्ञानी त्रिकालवृत्तान्तदर्शी मुक्त इत्येवं यस्य मोक्षे
ऽभिमानो नासौ ज्ञानी तथा चाहं योगाभ्यासी देहस्यैव गुणा धर्माधर्मौ ततः मम देहो बहु आहारादुपवासादिसमर्थ इत्येवं दे
हेऽप्यभिमानो नासौ योगी न वा ज्ञानी केवलमसौ दुःखभाक् दुःखहेतुत्वं ममाभिमानो न निवृत्त इत्यर्थः॥१०॥ सर्ववि
स्मरणोपदेशमुपसंहरति हर इ निस्पृष्टं॥ह॥ हरो यद्युपदेष्टा ते हरिः कमलजोऽपि वा॥ तथापि न तव स्वास्थ्यं सर्वविस्म
रणादृते॥११॥ इति विशेषोपदेशः षोडशकं प्रकरणं॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां विशेषोपदेशैका
दशाषोडशकं प्रकरणं॥१६॥ अथातः श्लोकविंशत्या तत्त्वज्ञस्य दशोच्यते॥ विद्यातद्गुणकर्षस्यवक्त्यये गुरुणा स्फुटं॥१॥
अयान्येषामपि विद्यार्थीप्रवृत्यर्थं तत्त्वज्ञानफलमारभ्य तुमिच्छया तत्त्वज्ञदशां गुरुर्निरूपति॥७॥ तेन ज्ञानफलं ३१
प्राप्तं योगाभ्यासफलं तथा॥ तृप्तः स्वच्छेन्द्रियो नित्यमेकाकी रमते तु यः॥१॥ तेनैव ज्ञानफलं प्राप्तं य आत्मन्येव तृ

न
प्तो भोगादिनाऽत एव स्वच्छेन्द्रियो विषयानासक्तेन्द्रियः स तु एकाकी विषयसंयोगं विनैव नित्यमात्मन्येव
रमते॥१॥ न कदाचिज्जगत्यस्मिन्तत्त्वज्ञो हन्त खिद्यति॥ यत एकेन तेनेदं पूर्णं ब्रह्माण्डमण्डलं॥२॥ हंतेति सहर्षसंबोध
ने हे शिष्य अस्मिन्जगति कदाचिदपि तत्त्वज्ञो न खिद्यते॥ यत एकेनैव तेनेदं ब्रह्माण्डमण्डलं पूर्णं व्याप्तं॥ अतो द्विती
यस्याभावान्न खिद्यतीत्यर्थः॥२॥ न जातु विषयाः केऽपि स्वारामं हर्षयन्त्यमी॥ सल्लकीपल्लवप्रीतमिवेभं निम्बपल्लवाः॥
३॥ स्वस्मिन्नात्मन्येव रमते तं स्वारामं जातु कदाचिदमी विषया न हर्षयन्ति तुच्छत्वात् पृथक्सत्तारहितत्वात्॥ यथा
सल्लकीपल्लवप्रीतं इभं गजं निम्बपल्लवा न हर्षयन्ति कटुकत्वादित्यर्थः॥३॥ यस्तु भोगेषु भुक्तेषु न भवत्यधिवासि
तः॥ अभुक्तेषु निराकांक्षी तादृशो भवदुर्लभः॥४॥ यस्तु भुक्तेषु भोगेष्वासक्तिर्न भवति॥ अभुक्तेषु आकांक्षा न भ
वति आत्मतृप्तत्वात्॥ तादृशो भवदुर्लभः संसारसागरे कोटिष्वेक इत्यर्थः॥४॥ बुभुक्षुरिह संसारे मुमुक्षुरपि दृश्य
ते॥ भोगमोक्षनिराकांक्षी विरलो हि महाशयः॥५॥ इह संसारे बुभुक्षुर्मुमुक्षुश्चानेकधा दृश्यते भोगमोक्षनिरा कु
कांक्षी महति पूर्णे ब्रह्मणि आशयोऽन्तःकरणं यस्य स महाशयो विरलः॥ यतता नामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥

३२ इति भगवद्वचनात् ॥५॥ धर्मार्थकाममोक्षेषु जीविते मरणे तथा ॥ कस्याप्युदारचित्तस्य हेयोपादेयता न हि ॥६॥
पुरुषार्थचतुष्टये तथा जीवितमरणयोर्यस्य योगिनो हेयोपादेयता रहितो विरलो इत्यर्थः ॥६॥ वांछा न विश्वविलये न
द्वेषस्तस्य च स्थितौ ॥ यथा जीविकया तस्माद्धन्य आस्ते यथासुखं ॥७॥ तस्माज्ज्ञानिनो विश्वविलये प्रपंचोपरमे वां
छा नास्ति तस्य प्रपंचस्य स्थितौ च द्वेषो नास्ति अधिष्ठानत्वेनैव स्फुरणात् । तस्मात् धन्यो योविद्वान् प्रारब्धवशात्
कृत्यमेवास्ते तथायथाप्राप्तया जीविकया सुखमनतिक्रमोवास्ते इत्यर्थः ॥७॥ कृतार्थोनेनज्ञानेनेत्येवं गलितधीः कृती ॥ प
श्यन्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्नास्ते यथासुखं ॥८॥ अहं अनेनात्मज्ञानेन कृतार्थो इत्येवं गलितधीः कृती चेता
नर्त्तनादिकं कुर्वन्नपि सुखमनतिक्रम्य कृतार्थत्वधियः सत्वाद्वहिरिंद्रियव्यापारे सत्यपि तान् अविर पि०ज्ञा निरव
क्तस्य तस्य खेदो न भवतीत्यर्थः ॥८॥ शून्या दृष्टिर्वृथा चेष्टा विकलानींद्रियाणि च ॥ न स्पृहा न विरक्तिर्वा क्षीण
संसारसागरे ॥९॥ क्षीणसंसारसागरो यस्य स तस्मिन् क्षीणसंसारसागरे पुरुषे स्पृहा विषये छापि न विरक्ति
श्च न अतस्तस्य मनकार्येंद्रियव्यापारो बालोन्मत्तादिवद्भवतीत्याह । शून्येति ॥ तस्य दृष्टिर्मनोव्यापारः शून्या ३२
कृ शून्येति

संकल्पविकल्परहिता चेष्टा कायव्यापारः वृथाफलमनुद्दिश्य प्रवर्त्तमाने इंद्रियाणि विकलानि पुरुषस्थितानामपि विषय
ग्राहकानिर्णायकत्वात् ॥ तदुक्तं भगवद्गीतायां ॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति ॥९॥ न जागर्त्ति न
निद्राति नोन्मीलयति न मीलति ॥ अहो परदशा क्वापि वर्तते मुक्तचेतसः ॥१०॥ ज्ञानी न जागर्त्ति जाग्रदवस्था
वान्न भवति ॥ अत एव बहिर्विषयाननुसंधानाद्दतिद्धेतुमाह ॥ नोन्मीलति ॥ बाह्यविषयान्नानुसंधत्ते इत्य
र्थः ॥ तथा ज्ञानी न निद्राति न तः सन् निमीलति ॥ जडो भवति ॥ अन्यथा सर्वान् विषयान् ब्रह्मत्वेन पश्यतीत्य
र्थः ॥ का तर्हि तस्य दशेत्यत आह ॥ अहो इति आश्चर्ये मुक्तचेतसः क्वापि अलौकिकी परदशा तुरीयावस्था तुरी
यातीतेत्यर्थः ॥१०॥ इदमेव विशदयति ॥ सर्वत्र दृश्यते स्वस्थः सर्वत्र विमलाशयः ॥ समस्तवासनामुक्तो मुक्तः
सर्वत्र राजते ॥११॥ सर्वत्र सुखे दुःखे च स्वस्थचित्तः ॥ तथा सर्वत्र शत्रौ मित्रे च विमलाशयः समानदर्शी ॥ यतः सम
स्तविषयवासनाभ्यो मुक्तः ॥ अत एव मुक्तः सर्वत्र सर्वासु दशासु राजते दीप्यते पूर्णात्मदर्शित्वात् ॥११॥ पश्यन्शृण्वन्
स्पृशञ्जिघ्रन्नश्नन्गृह्णन्वदन्व्रजन् ॥ ईहितानीहितैर्मुक्तो मुक्त एव महाशयः ॥१२॥ प्रारब्धवशाद्दृशा

दिकंबाहिरिंद्रियव्यापारंकुर्वन्नपिईहितानीहितैरहितोदेहेभ्योमुक्तोमहाशयोमहतिआत्मनिआशयोयस्यमुक्तएवम
नोविकारातीतत्वात्॥१२॥इदमेवविशदयति॥७॥ननिंदतिनस्तौति॥०॥ननिंदतिनचस्तौतिनहृष्यतिनकुप्य
ति॥नददातिनगृह्णातिमुक्तःसर्वत्रनीरसः॥१३॥ननिंदतिनस्तौतिनहर्षंप्राप्नोतिनकेषुकोपंकरोतिनसर्वथा॥
कस्मैचिन्नगृह्णाति॥सर्वत्रनीरसःमुक्तइत्यर्थः॥१३॥किंच॥सानुरागांस्त्रियंदृष्ट्वामृत्युंवासमुपस्थितं॥
अविह्वलमनाःस्वस्थोमुक्तएवमहाशयः॥१४॥सानुरागांस्त्रियंदृष्ट्वाअथवासमुपस्थितंमृत्युंदृष्ट्वाह्यविकलम
नाः॥काममयाभ्यांविमुक्तमनामहाशयोमुक्तएव॥१४॥किंच॥सुखेचेतिस्पष्टं॥सुखेदुःखेनरेनार्यांसंपत्सुचविपत्सु
च॥विशेषोनैवधीरस्यसर्वत्रसमदर्शिनः॥१५॥नहिंसानैवकारुण्यंनौद्धत्यंनचदीनता॥नाश्चर्यंनैवचक्षोभःक्षीण
संसरणेनरे॥१६॥क्षीणसंसरणेअनेनेराभिमानरहितेविदुषिहिंसानामपरद्रोहइत्यादयोमनोविकारान
भवंतीत्यर्थः॥१६॥नमुक्तोविषयद्वेष्टानवाविषयलोलुपः॥असंसक्तमनानित्यंप्राप्ताप्राप्तमुपाश्नुते॥१७॥जीवन्मु ३२
क्तःविषयद्वेष्टापिनभवतिविषयलोलुपःकिंतर्हिअसंसक्तमनाःप्रारब्धवशात्प्राप्ताप्राप्तमुपाश्नुतेमुक्तइत्य

र्थः॥१७॥समाधानासमाधानहिताहितविकल्पनाः॥शून्यचित्तोनजानातिकैवल्यमिवसंस्थितः॥१८॥शून्य
चित्तोज्ञानीसमाधानादिविविधाःकल्पनानजानाति॥अस्मिन्नेवविदेहकैवल्यंप्राप्तइव॥१८॥निर्ममोनिरहंकारोनकिं
चिदितिनिश्चितः॥अंतर्गलितसर्वाशःकुर्वन्नपिनकरोतिन॥१९॥अहंममाभिमानशून्यतयाधिष्ठानातिरिक्तंकिंचि
न्नास्तीतिनिश्चयवान्अतएवअंतर्गलितसर्वाशःअतएवकुर्वन्नपिनकरोतिकर्तृत्वाभिमानरहितत्वादित्यर्थः॥१
९॥मनःप्रकाशसंमोहःस्वप्नजाड्यविवर्जितः॥दशांकामपिसंप्राप्तोभवेद्गलितमानसः॥२०॥गलितंसर्वविशेषवृत्तिहीन
मानसंयस्यसज्ञानीकामपिअनिर्वाच्यांदशांसंप्राप्तोभवेत्तदेवदर्शयति॥मनेति॥मनःप्रकाशविवर्जितःसर्वविशेषप्र
काशाभावात्॥तथासंमोहवर्जितःसम्यक्स्वरूपचिंतनात्अतएवस्वप्नविवर्जितोजाड्यंनसुषुप्त्याचविवर्जितइत्यर्थः
२०॥इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायांतत्त्वज्ञस्वरूपविंशतिकंसप्तदशंप्रकरणं॥१७॥तत्त्वाभिज्ञे
फलिभूतसमस्तसुखप्रधानतां॥व्याख्यातुंवर्ण्यतेशांतिःशतश्लोकैःपुनःस्फुटं॥तत्रतावत्शांतेप्रसक्तप्रव
णप्रधानेतितख्यापयितुंफलिभूतांशांतिवर्णयितुकामःशांतिशालिनंनमस्करोति॥१॥यस्यबोधोदयेतावत्स्वप्न

अ०टी०

३४ बद्धवति भ्रमः॥ तस्मै सुखैकरूपाय नमः शांताय तेजसे॥ १॥ बोधोदये सति तावत्तत्त्वेनैव प्रपंच भ्रमः
स्वप्नवत्तुच्छोयस्य ज्ञातो भवति तस्मै शांताय निहतसंकल्पविकल्पाय अत एव सुखैकरूपाय दुःखान
नुविद्धसुखस्य भावाय अत एव तेजसे स्वप्रकाशाकाय विदुषे नमः॥ १॥ ननु धनिनोपि सुखिनो दृश्यंते तत्कथं
शांतसंकल्पस्यैव सुखैकरूपत्वमित्याशंक्याह॥ ७॥ अर्जयित्वाखिलानर्थान् भोगानाप्नोति पुष्कलान्॥ नहि
सर्वपरित्यागमंतरेण सुखी भवेत्॥ २॥ अखिलानर्थान् धनधान्यकांतादीनर्जयित्वा पुष्कलान् बहुविधान् को
नादीनर्जयित्वा पुष्कलान् बहुविधा भोगानेवाप्नोति न तु सुखैकरूपस्स्यात् ततद्व्ययेदुःखभाणित्वात्॥ स
र्वपरित्यागमंतरेण सर्वसंकल्पविकल्पत्यागं विना सुखैकरूपो नहि भवितुं नैव स्यात्॥ २॥ संकल्पविकल्पयो
स्तुच्छत्वज्ञानमेव त्यागमात्रस्य तथात्वात्॥ यथा वंध्यापुत्रे तुच्छत्वज्ञानमेव त्यागः॥ असतः त्यागासंभवात् इद
मेव रूपकालंकारेण विशदयति॥ ७॥ कर्तव्य दुःखमार्तंडज्वालादग्धांतरात्मनः॥ कुतः प्रशमपीयूषधा ३४
रासारमृते सुखं॥ ३॥ कर्तव्यान्नियानि कर्माणि तज्जनिता दुःखान्येव मार्तंडज्वाला खरतरसूर्यतापस्ते

आ

आ॥ न दग्धो अंतरात्मा मनो यस्य तस्य संकल्पविकल्पप्रशमामृतधारालक्षणासारं विना सुखं कुतः स्यात्॥ ३॥ संकल्प
विकल्पप्रशमस्यामृतत्वं संसाररूपविषविवर्तकत्वादित्याशयेनाह॥ ७॥ भवोयं भावनामात्रो न किंचित्परमार्थतः
॥ नास्त्यभावः स्वभावानां भावाभावविभाविनां॥ ४॥ अयं भवः भावनामात्रः ससंकल्पमात्रप्रभवः॥ परमार्थतः
आत्मव्यतिरिक्तं किंचिन्नास्ति परमार्थवस्तु आत्मैव भावरूपः॥ नन्वभावरूपोपि प्रपंचः कालादिवशात् भाव
स्वभावः स्यादित्याशंक्याह॥ नास्तीति॥ भावाभावेषु विभाविनां स्थितस्वभावानाम भावो नास्ति नहि तुलस्य भावो व
न्हि कदाचिदपि शीतलस्वभावो दृष्टः तथा च मनोराज्यवद्भावनामात्रसिद्धः सकृद्भावः प्रपंचो भावनानि
वृत्तौ निवर्तत इति संकल्पप्रशम संसारविषतापागमादात्मामृतप्राप्तिहेतुत्वादमृतमिति भावः॥ ४॥ न
तु संकल्पोपशममात्रेण कथमात्मामृतप्राप्तिरित्याशंक्याह तस्य नित्यप्राप्तत्वमाह॥ ७॥ न दूरं न च संकोचा
ल्लब्धमेवात्मनः पदं॥ निर्विकल्पं निरायासं निर्विकारं निरंजनं॥ ५॥ आत्मनः पदस्वरूपं दूरं नास्ति नापि सं
कोचादवतेः परिछिन्नं नास्ति परिपूर्णत्वात्॥ अत एवात्मनः पदं नित्यलब्धं प्राप्तमेवास्ति संकल्पवशा

न्तुमरशास्त्रमिवाविद्वांसो मन्यंते कुंठगतचामीकरवत्॥ कीदृशं पदं निर्विकल्पं विकल्पातीतं विकल्पाभावग
म्यं वा तथा निरामयं आयासातीतं तद्भावगम्यं वा निर्विकारं विकारातीतं॥ निरंजनमुपाधिमलशून्यं॥५॥
कथं तर्हि तत्त्वज्ञानेन तत्प्राप्तिव्यवहारः शास्त्रं कारणमित्याशंक्य भ्रांतिनाशमात्रादेवेत्याह॥छ॥ व्यामोहमात्रवि
रतौ स्वरूपादानमात्रतः॥ वीतशोका विराजंते निरावरणदृष्टयः॥६॥ ज्ञानेन निरावरणदृष्टयः अविद्यानावृतदृ
ष्टयः॥ व्यामोहमात्रस्य विरतौ सत्यां स्वरूपादानमात्रतः आत्मविश्रांतिमात्रतो वीतशोका विराजंते सर्वदा स्वभावे
नैव पूर्णा द्वितीयतया प्रकाशंत इत्यर्थः॥६॥ आत्मज्ञानरहस्यमाह॥छ॥ स्पष्टार्थमिदं॥छ॥ समस्तं कल्पनामात्रमा
त्मा मुक्तः सनातनः॥ इति विज्ञाय धीरो हि किमभ्यस्यति बालवत्॥७॥ समस्तं कल्पनामात्रमिति ज्ञानस्य निद
र्शनभूतं तत्त्वंपदार्थैक्यज्ञानमाह॥ आत्मेति॥ आत्मा त्वंपदार्थः ब्रह्म तत्पदार्थो भिन्न इति निश्चित्य [illegible] इति च नि
श्चित्य भावाभावौ च कल्पितौ॥ निःकामः किं विजानाति किं ब्रूते च करोति किं॥८॥ आत्मा त्वंपदार्थः ब्रह्म तत्प
दार्थो भिन्न इति निश्चित्य अधिष्ठानसाक्षात्काराच्च भावो घटादिपदभावो कल्पिताविति निश्चित्य तथा च सर्वस्य ३५

तुच्छत्वानुसंधानात्कामहेतुविद्याविलयाच्च निःकामः सन् किं विशिष्टतया जानाति किं ब्रूते किं च कार्यं करोति क
र्तृत्वाभिमानरहितत्वात्॥ ज्ञानापि न बकापि न क्रियाकर्त्तेत्यर्थः॥८॥ सर्वमात्मेति ज्ञानेन सर्वे कल्पना निव
र्तंत इत्याह॥छ॥ अयं सोहमयं नाहमिति क्षीणा विकल्पना॥ सर्वमात्मेति निश्चित्य तूष्णींभूतस्य योगिनः॥
९॥ सर्वमात्मेति निश्चित्य अनुभूय तूष्णींभूतस्य पराग्निवृत्तयोगिनो लक्षणमनुनोक्तं॥ चित्तिहीनं मनः
कृत्वा क्षेत्रज्ञं परमात्मनि॥ एकीकृत्य विमुच्येत मुख्योयं योग उच्यत इति स्वस्थास्ती तद्योगिनस्तस्य योगिनो
व्यापारस्य पुंस इति विविधा कल्पना क्षीणा भवंतीति इति किं अहं करोमि॥ यद्वाहं पूर्वं दिने ब्रूतमकरवं सो
हं जपामि॥ अयं देवदत्तो गच्छति नाहं गच्छामीत्यादयः कल्पना क्षीणा भवंतीत्यर्थः॥९॥ निवृत्तसंकल्पस्य
स्वरूपमाह न विक्षेपमित्याभ्यां॥छ॥ न विक्षेपो न चैकाग्र्यं नातिबोधो न मूढता॥ न सुखं न च वा दुःखमु
पशांतस्य योगिनः॥१०॥ उपशांतस्य विकल्पशांतस्य योगिनः विक्षेपो व्यग्रता न एकाग्र्यादिकमपि नेत्यर्थः
॥१०॥ स्वाराज्ये भैक्षवृत्तौ च लाभालाभे जने वने॥ निर्विकल्पस्वभावस्य न विशेषोस्ति योगिनः॥११॥

स्वाराज्ये स्वर्गराज्ये भैक्ष्यवृत्तौ च पारथ्ये वसमस्तुलाभे तद्भावे जने जनसमूहे॥ विजने वने च विशेषो योगिनो
नास्ति। कीदृशस्य विकल्परहितस्वभावस्येत्यर्थः॥११॥ क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकिता॥ इदं कृतमिदं
नेति द्वंद्वैर्मुक्तस्य योगिनः॥१२॥ इदं कृतमिदं न कृतमित्यादिद्वंद्वैर्मुक्तयोगिनः धर्मार्थकामाः विवेकिता मोक्षोपाय
भूतो विवेकश्च न भवति॥ तन्मूलभूताविद्याकामसंकल्पादीनां विनाशादित्यर्थः॥१२॥ कथं तर्हि जीवन्मुक्तस्य लो
के क्रियेत्याशंक्य जीवनादृष्टवशादेवेत्याह॥ कृत्यं किमपि नैवास्ति न कापि हृदि रंजना॥ यथा जीवनमेवेह जी
वन्मुक्तस्य योगिनः॥१३॥ जीवन्मुक्तस्य योगिनः संकल्पवशात् किमपि कृत्यं नास्ति॥ तथा हृदि मनसि कापि रंजना
कोपि अनुरागो नास्ति॥ तद्धेतुभूताविद्यायाः अभावात्॥ तथापि अस्य कृत्यं यथा जीवनादृष्टमनतिक्रम्य भवतीति
अर्थः॥१३॥ क्व मोहः क्व च वा विश्वं क्व तद्ध्यानं क्व मुक्तता॥ सर्वसंकल्पसीमायां विश्रांतस्य महात्मनः॥१४॥ संकल्प
सीमायां आत्मबुद्धौ विश्रांतस्य मोहादिकं क्व भवति किं कारणमाश्रित्य भवति न किमपि कारणमाश्रित्य भवति ३८
आत्मबुद्ध्याकारणोपमर्दादित्यर्थः॥१४॥ येन विश्वमिदं दृष्टं स नास्तीति करोतु वै॥ निर्वासनः किं कुरुते पश्य

न्नपि न पश्यति॥१५॥ येन इदं विश्वं घटपटादि दृष्टं स तदाहितसंस्कारकदाचित् घटादिकं नास्तीति करोतु वै
नास्ति आत्मा तु यः पश्यन्नपि न पश्यति स निर्वासनः सन् किं कुरुते॥ यद्विषयकः संस्कारोपि नास्ति तस्य कर्तु
मशक्यत्वादित्यर्थः॥१५॥ येन दृष्टं परं ब्रह्म सोहं ब्रह्मेति चिंतयेत्॥ किं चिंतयति निश्चिंतो द्वितीयं यो न पश्य
ति॥१६॥ येन परं व्यापकं ब्रह्म दृष्टं स अहं ब्रह्मेति चिंतयेत्॥ यस्तु द्वितीयं न पश्यति स निश्चिंतः सर्वचिंतार
हितः सन् किं चिंतयति न किमपि चिंतयति॥ अद्वितीयात्मानुभवशालिनि ब्रह्मचिंतनमपि नास्ती
त्यर्थः॥१६॥ ज्ञानिनश्चित्तनिरोधोपि नास्तीत्याह॥ दृष्टो येनात्मविक्षेपो निरोधं कुरुते त्वसौ॥ उदारस्तु
न विक्षिप्तः साध्याभावात्करोति किं॥१७॥ येन आत्मविक्षेपश्चित्तादभ्रमो दृष्टः॥ असौ पुरुषश्चित्तनिरोधं
कुरुते विक्षेपपरिहारार्थं उदारः सर्वत्र द्वितीयात्मदर्शी तु विक्षिप्त एव नास्ति सविक्षेपपरिहार[illegible]ल
क्षणस्य साध्यस्याभावात् किं कुरुते कथं निरोधं कुरुत इत्यर्थः॥१७॥ इदमेव विवृणोति॥ धीरो लोकविप
र्यस्तो वर्तमानोपि लोकवत्॥ न समाधिं न विक्षेपं न लेपं स्वस्य पश्यति॥१८॥ धीर अद्वितीयात्मविश्रांतः लो

क्र०८।०

कल्पिपर्यस्तः लोके श्रुतिक्षेपरहितः प्रारब्धवशाल्लोके वर्त्तमानोप्यबाधितानुवृत्त्या व्यवहारपरोपि सन् यस्मा
धैर्यं विक्षेपस्तथा अयं विक्षेपकृतो लेपश्चात्मनः कृत्यादिकं न पश्यति चिन्मात्रदर्शित्वात्॥ ॥ भावाभावविहीनो
यस्तृप्तो निर्वासनो बुधः॥ नैव किंचित्कृतं तेन लोकदृष्ट्यापि कुर्वता॥१८॥ यो बुधस्तृप्तः स्वात्मानुभवतृप्तत्वमत एव भावस्तु
तिनिंदाविहीनः॥ अत एव निर्वासनः तेन लोकदृष्ट्या कुर्वतापि किंचिदपि नैव कृतं तस्मात् अकर्त्तात्मज्ञानेन कर्तृत्वाध्या
सबाधादित्यर्थः॥१९॥ इदमेव विशदयति॥ ॥ प्रवृत्तौ वा निवृत्तौ वा नैव धीरस्य दुर्ग्रहः॥ यदा यत्कर्त्तुमायाति तत्कृत्वा
तिष्ठतः सुखं॥२०॥ धीरस्यात्मविश्रांतस्य प्रवृत्तौ वा निवृत्तौ वा दुर्ग्रहः कर्तृत्वाभिमानो नास्ति कीदृशस्य धीरस्य प्रारब्ध
वशात् यदा यत्प्रवृत्तं वा निवृत्तं वा कर्त्तुमायाति तत्सुखमनायासं यथा स्यात्तथा कृत्वा तिष्ठतः अतः कर्तृत्वाभिमानाभावा
त्तज्ज्ञानिनां कृतमकृतमेवेत्यर्थः॥२०॥ ननु ज्ञानि चेन्निर्वासनस्तर्हि केन प्रयुक्तः कर्म करोतीत्याशंक्याह॥ ॥
निर्वासनो निरालंबः स्वच्छंदो मुक्तबंधनः॥ क्षिप्तः संस्कारवातेन चेष्टते शुष्कपर्णवत्॥२१॥ निर्वासनः अत एव ३१
निरालंबः कर्त्तव्यानुसंधानरहितः अत एव स्वच्छंदः रागद्वेषानधीनः यतो मुक्तबंधनः बंधहेतुरज्ञानं तन्नाशाज्ज्ञानी

संस्कारवातेन क्षिप्तः प्रारब्धपवनेन प्रेरितः सन् शुष्कपर्णवच्चेष्टते॥२१॥ संसारसंकल्पादिशून्यस्तु सर्वदा संतु
ष्ट एवेत्याह॥ ॥ असंसारस्य तु क्वापि न हर्षो न विषादता॥ स शीतलमना नित्यं विदेह इव राजते॥२२॥ न विद्यते संसा
रो यस्येति असंसारस्य॥ न विद्यते संसारहेतुः संकल्पो यस्य संसारस्य हर्षादिका ऊर्मयो न जायंते अत एव ऊर्मिरहित
त्वात् नित्यं शीतलमना विदेहमुक्त इव राजते षडूर्मिरहितः शिव इति स्मृतेः॥२२॥ कुत्रापि न जिहासास्ति ना
शो वापि न कुत्रचित्॥ आत्मारामस्य धीरस्य शीतलाच्छतरात्मनः॥२३॥ आत्मारामस्य अत एव धीरस्य निश्चलचि
त्तस्य अत एव शीतलः अच्छतरो निर्मलतरः आत्ममनो यस्य शीतलाच्छतरात्मनः॥ ज्ञानिनः कुत्रापि जिहासा त्या
गेच्छा नास्ति रागद्वेषाभावात्॥ नाशोप्यनर्थोपि कुत्रचिन्नास्ति अनर्थहेतोरज्ञानस्याभावादित्यर्थः॥२३॥ प्रकृ
त्या शून्यचित्तस्य कुर्वतोस्य यदृच्छया॥ प्राकृतस्येव धीरस्य न मानो नावमानता॥२४॥ प्रकृत्या स्वभावे
न शून्यचित्तस्य विकाररहितचित्तस्य तस्य धीरस्य आत्मविश्रांतस्य प्राकृतस्येव अज्ञानिन इव यदृच्छया प्रारब्ध
वशात् कुर्वतोस्य विदुषः स्वमानापमानानुसंधानं नास्तीत्यर्थः॥२४॥ कृतं देहेन कर्मेदं न मया शुद्धरूपिणा॥

इति चिंतानुरोधी यः कुर्वन्नपि करोति न ॥२५॥ कृतं देहेनेति चिंतानुरुध्यते निरंतरं प्रयाति श्रयति स कुर्वन्नपि
न करोति ॥ कर्तृत्वाभिमानाभावादित्यर्थः ॥२५॥ अतद्वादीव कुरुते न भवेदपि बालिशः ॥ जीवन्मुक्तः सुखी श्री
मान्संसरन्नपि शोभते ॥२६॥ जीवन्मुक्तः अतद्वादीव अहमिदं करिष्यामीत्यवदन्नेव कार्यं कुरुते प्रारब्धवशाद्व
दन्नपि बालिशो मूर्खो न भवेत् ॥ अतज्ज्ञानित्वात् ॥ अत एव संसरन्नपि अतः सुखी अत एव श्रीमान् ॥ प्रसन्नत
याशोभावान् अत एव शोभते दीपनेस्वव प्रकाश इत्यर्थः ॥२६॥ नानाविचारसुश्रांतो धीरो विश्रांतिमागतः ॥
न कल्पते न जानाति न शृणोति न पश्यति ॥२७॥ नानाविचाराद्द्वैतविचारात्सुश्रांतः स्वनिवृत्तो यतो धीरो ज्ञानी
अत एव आत्मन्येव विश्रांतिमागतः ॥ अत एव न कल्पते संकल्पादिकं मनोव्यापारं न करोति न जानाति बुद्धिव्यापा
रं न करोति शब्दं न शृणोति रूपं न पश्यति इंद्रियमात्रव्यापारं न करोति कर्तृत्वाभिमानाभावादित्यर्थः ॥२७॥ अस
माधेरविक्षेपान्न मुमुक्षुर्न चेतरः ॥ निश्चित्य कल्पितं पश्यन्ब्रह्मैवास्ते महाशयः ॥२८॥ ज्ञानी मुमुक्षुर्न भव ३८
ति ॥ असमाधेः समाधेः करणात् तथा इतरो बंधो न भवति अविक्षेपाद्द्वैतभ्रमाभावादित्यर्थः ॥ कीदृश

स्तर्हि ज्ञानीत्याशंक्याह ॥ निश्चित्येति ॥ इदं सर्वं संकल्पितमिति पूर्वं निश्चित्य पश्चाद् बाधितानुवृत्त्या पश्यन्न
पि महाशयो निर्विकारचित्तः अत एव ब्रह्मैवास्ते ॥२८॥ ननु समाधेः पश्यं श्लोकस्यार्थं वृत्तेत्याशंक्याहंकारा
भावादित्याह ॥ ७ ॥ यस्यांतः स्यादहंकारो न करोति करोति सः ॥ निरहंकारधीरेण न किंचिदकृतं कृतं ॥२९॥
यस्यांतःकरणेऽहंकाराध्यासः स्यात् स लोकदृष्ट्या न कुर्वन्नपि संकल्पादिकं करोति कर्तृत्वाध्यासात् निरहंका
रेण अत एव धीरेण कर्तृत्वाध्यासरहितेन यद्यपि लोकदृष्ट्या कृतं तथापि स्वदृष्ट्या न किंचिदपि कृतं ॥ कर्तृत्वा
ध्यासाभावादित्यर्थः ॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यत इति ॥२९॥ मुक्तचित्तं वर्णयति नोद्विग्नमि
ति द्वाभ्यां ॥७॥ नोद्विग्नं न च संतुष्टमकर्तृ स्पंदवर्जितं ॥ निराशं गतसंदेहं चित्तं मुक्तस्य राजते ॥३०॥ मु
क्तस्य चित्तं राजते केवलप्रकाशरूपमेव ॥ यतो नोद्विग्नं उद्वेगहेतोर्द्वेषस्याभावात् न च संतुष्टं संतोषहेतो
रनुरागाभावात् ॥ तथा कर्तृ स्पंदवर्जितं संकल्पविकल्पशून्यम् अत एव निराशं गतसंदेहं यस्मात्कृत
संदेहं संदेहहेतोरज्ञानस्य नष्टत्वादित्यर्थः ॥३०॥ निर्ध्यातुं चेष्टितुं वापि यच्चित्तं न प्रवर्तते ॥ निर्निमि

॥ तमिदंकिंतुनिर्ध्यायतिविचेष्टते॥३१॥अस्यज्ञानिनस्थितंनिर्निमित्तंसंकल्परहितमेवसन्ननिर्ध्यातुंनिः
क्रियत्वेनस्थातुंचेष्टांसंकल्पादिरूपांकर्तुंवापिनप्रवर्ततेनसंकल्पयतिकिंतुइदंज्ञानिनस्थितंनिर्निमि
त्तंसंकल्परहितमेवसन्ननिर्ध्यायतिनिश्चलेस्वरूपेतिष्ठति।तथापिविचेष्टतेविविधांचेष्टांकरोतीत्यर्थः॥३१॥
ज्ञान्यज्ञानिनोर्विशेषंवदन्नेवज्ञानिनोविरलत्वमाह॥छ॥तत्त्वंयथार्थमाकर्ण्यमंदःप्राप्नोतिमूढतां॥
अथवायातिसंकोचममूढःकोपिमूढवत्॥३२॥मंदाज्ञानीयथार्थंतत्त्वंपदार्थाभेदंश्रुतेराकर्ण्यअ
संभावनाविपरीतभावनाभ्यांमूढतामविवेकंप्राप्नोति॥अथवाशास्त्रार्थसाक्षात्कारायसंकोचंचि
त्तसमाधिमायाति॥कोपिसहस्रेष्वेकःअंतरसंमूढोपिबाह्यगत्यामूढवद्बहिर्व्यवहारकर्त्ताभवति॥३२॥
अथवायातिसंकोचमित्यनेनोक्तांवैकाग्रतांनिरोधंदूषयति॥छ॥एकाग्रतानिरोधोवामूढैरभ्यस्यते
भृशं॥धीराःकृत्यंनपश्यंतिसुप्तवत्स्वपदेस्थिताः॥३३॥एकाग्रताएकमेवध्येयंयस्यतदेकाग्रमेका ३९
ग्रस्यभावःएकाग्रताएकत्रैवनिष्ठचित्तता।अथवानिरोधःचित्तविलयोमूढैरनुत्पन्नात्मसाक्षा

त्कारैर्विपरीतभावनानिवृत्त्यर्थंभृशमत्यर्थमभ्यस्यतेसुप्तवत्स्वदेहात्मधीराहित्येनस्वरूपेस्थिताधीरावि
ज्ञानिनस्तुप्राप्तंकिमपिकृत्यंनपश्यंतिअद्वैतानंदात्मसाक्षात्कारेणैवात्मानंदादिभ्रमस्यदूरापास्त
त्वादित्यर्थः॥३३॥निरोधस्याकिंचित्करतामाह॥छ॥अप्रयत्नात्प्रयत्नाद्वामूढोनाप्नोतिनिर्वृतिं॥तत्त्व
निश्चयमात्रेणप्राज्ञोभवतिनिर्वृतः॥३४॥मूढःपुरुषःमूढोब्रह्मात्मैकत्वनिश्चयशून्यःअप्रयत्नाच्चित्त
निरोधात्प्रयत्नात्कर्मानुष्ठानाद्वानिर्वृतिंपरसुखंनप्राप्नोति॥आनंदहेतोरात्मानंदानुभवाभावादि
त्यर्थः॥प्राज्ञस्तुसमाधिंवाकर्मवाप्यकुर्वन्नतत्त्वनिश्चयमात्रेणकृतार्थोभवतिदुःखहेतोरज्ञानस्यध्वस्ता
दित्यर्थः॥३४॥ननुमूढस्ययोगाभ्यासादात्मानुभवोभविष्यतीत्याशंक्यनेत्याह॥छ॥शुद्धंबुद्धंप्रियंपूर्णं
निःप्रपंचंनिरामयं॥आत्मानंतंनजानंतितत्राभ्यासपराजनाः॥३५॥तत्रजगत्यभ्यासपराजनाअज्ञानि
नःआत्मानंतंनजानंतिकीदृशंशुद्धंमायामलातीतमतएवबुद्धंस्वप्रकाशंप्रियंसुखस्वरूपंपूर्णंयतो
निःप्रपंचमतएवनिरामयंदुःखसंबंधरहितं॥३५॥इदमेवविवेचयति॥छ॥नाप्नोतिकर्मणामो

४० द्धिंविमूढोभ्यासरूपिणा॥धन्योविज्ञानमात्रेणमुक्तस्तिष्ठत्यविक्रियः॥३६॥विमूढोनात्मज्ञः अभ्यासरूपिणा
योगाभ्यासात्मकेनकर्मणामोक्षंनाप्नोति॥नकर्मणानप्रजयाधनेनेतिश्रुतेः॥धन्योभाग्यवान्विरलोविज्ञानमा
त्रेणाविक्रियनिरस्ताविद्याकामकर्मअतएवमुक्तस्तिष्ठति॥३६॥मुमुक्षुरपिमूढोब्रह्मनाप्नोतीत्याह॥छ॥मू
ढोनाप्नोतितद्ब्रह्मयतोभवितुमिच्छति॥अनिच्छन्नपिधीरोहिपरब्रह्मस्वरूपभाक्॥३७॥मूढोऽज्ञानीयतःचि
त्तनिरोधादेवब्रह्मभवितुंइच्छतिअतोब्रह्मनाप्नोतिहिनिश्चितंधीरोज्ञानीअनिच्छन्नपिपरब्रह्मस्वरूपभाक्
भवधायकांज्ञानस्यानिवर्तनत्वादित्यर्थः॥३७॥एतदेवस्पष्टयति॥छ॥निराधाराग्रहव्यग्रामूढाःसंसारपोषकाः
एतस्यानर्थमूलस्यमूलच्छेदःकृतोबुधैः॥३८॥मूढाअज्ञानिनःनिराधाराग्रहव्यग्राःकेवलेनचित्तनिरोधे रो४
नैवाहंमोक्ष्यामीतिनिःकारणदुराग्रहव्यग्राःप्रत्युतसंसारपोषकाः॥संसारनिवर्तकज्ञानपराङ्मुखत्वा
द्बुधैःज्ञानिभिःअनर्थमूलस्यएतस्यसंसारस्यमूलच्छेदःकृतःसंसारमूलमज्ञानंतस्याज्ञानस्यज्ञानेनाभिवर्तनत्वादि ४०
त्यर्थः॥३८॥नशांतिंलभतेमूढोयतःशमितुमिच्छति॥धीरस्तत्त्वंविनिश्चित्यसर्वदाशांतमानसः॥३९॥

मूढःअज्ञानीएतच्चित्तनिरोधादेःशमितुमिच्छतिनततःशांतिंलभते।धीरोविवेकीतत्त्वंविनिश्चित्यशमितुमनि
च्छन्नपिस्वाभावादेवसदाशांतमानसोभवतियतोविकारहेतोरज्ञानस्यनिवर्तनत्वादित्यर्थः॥३९॥क्वात्मनोदर्श
नंतस्ययद्दृष्टमवलंबते॥धीरास्तंतंनपश्यंतिपश्यंत्यात्मानमव्ययं॥४०॥यद्दृष्टंयस्यदृष्टंज्ञानमवलंबतेदृश्यंवि
षयीकरोतितस्यात्मनोदर्शनंक्वनक्वापीत्यर्थः॥धीराज्ञानिनस्तंतंतिमिरप्रदीपनादिकंनदृश्यंतिकिंतुचिद्रूपमा
त्मानंपश्यंति॥४०॥क्वनिरोधोविमूढस्ययोनिर्बंधंकरोतिवै॥स्वारामस्यैवधीरस्यसर्वदासावकृत्रिमः॥४१॥
यःअज्ञानीमुमुक्षुचित्तनिरोधेनिर्बंधंकरोतितस्यविमूढस्यक्वचित्तनिरोधःनक्वापि॥अज्ञानीनांसमाध्यु
परमेपुनश्चित्तप्रसरात्स्वात्मारामस्यै कात्मारामस्यअतएवनिश्चलचित्तस्यसर्वदासौचित्तनिरोधःअकृ
त्रिमःस्वात्मारामःस्वाभाविकःसर्वदास्वात्मानुभावशालित्वात्॥४१॥भावस्यभावकःकश्चिन्नकिंचिद्भाव
कोपरः॥उभयाभावकःकश्चिदेवमेवनिराकुलः॥४२॥कश्चित्तार्किकादिर्भावस्यभावकःभावरूपंपरमा
र्थःसत्प्रपंचइतिभावयतिमन्यते।इतिभावस्यभावकः॥अपरःशून्यवादीबौधःनकिंचिदस्तीतिवि

भावयतीति नकिंचिद्भावकः कश्चित्सहस्रेष्वेकश्चिदात्मानुभवशालीउभयाभावकः अनेदमेवउभयाभावेनै
वनिराकुलः स्वस्थचित्त आस्तइत्यर्थः॥४२॥ नकिंचिदपिचिंतयेदितिभगवद्वचनं संसिद्धांतमभिप्रेत्याह॥
छ॥शुद्धमद्वयमात्मानं भावयंतिकुबुद्धयः॥नतुजानंतिसंमोहाद्यावज्जीवमनिर्वृताः॥४३॥कुबुद्धयोमू
ढबुद्धयएवशुद्धंनिर्मलमद्वयंद्वैतवर्जितमात्मानमननशीलंव्यापकंभावयंतिचिंतयंतिजानंतिसाक्षात्कु
र्वंतिकुतः संमोहान्निर्मलत्वस्यकल्पितमलसापेक्षत्वादद्वयस्यकल्पितद्वैतसापेक्षत्वात॥ आत्मत्वस्य
चकल्पितानात्मसापेक्षत्वात्सापेक्षरूपचिंतनेनतुमोहानिवृत्तेः यतोनजानंति॥ अतएवयावज्जीवम
निर्वृत्ताः परमसंतोषरहिताः संतोषस्यज्ञानैकलभ्यत्वादित्यर्थः॥४३॥ इदमेवविशदयति॥छ॥मुमुक्षोर्बुद्धि
रालंबमंतरेणनविद्यते॥निरालंबैवनिष्कामाबुद्धिर्मुक्तस्यसर्वदा॥४४॥मुमुक्षोरनधिगतात्मसाक्षात्का
रस्यबुद्धिःसविशेषालंबनमंतरेणनविद्यतेसाक्षात्काराभावात्॥मुक्तस्यजीवन्मुक्तस्यअतएवमुक्ता ४१
अपिनिष्कामाबुद्धिः सर्वदानिरालंबैवनिर्विशेषात्मानुभवरूपैवसविशेषादपरित्यागएवात्मानु

भवः॥४४॥ निरोधोपिविषयस्फूर्तिचकितैरेवानुष्ठीयतेनतुविशेषज्ञैरित्याह॥छ॥विषयद्वीपिनोवीक्ष्यच
किताः शरणार्थिनः॥विशंतिझटितिक्रोडंनिरोधैकाग्र्यसिद्धये॥४५॥विषयद्वीपिनोविषयव्याघ्रान्वीक्ष्य
शार्दूलद्वीपिनोव्याघ्रइत्यमरः॥ भीताः शरणार्थिनः स्वात्मरक्षणार्थिनोमूढाएवनिरोधसिद्धयेकैरो लक्ष्यव
त्तिसिद्धयेवाझटितिशीघ्रंक्रोडंकंदरांतःप्रदेशंविशंतिनतुज्ञानिनइत्यर्थः॥४५॥वासनात्यागएवविषय
भयनिवृत्तिहेतुरित्याह॥छ॥निर्वासनंहरिंदृष्ट्वातूष्णींविषयदंतिनः॥पलायंतेनशक्तास्तेसेवंतेकृत
चाटवः॥४६॥निर्वासनोयः पुरुषस्तल्लक्षणंहरिंसिंहंदृष्ट्वाविषयदंतिनोनसक्ताः संतस्तूष्णींमौनंयथा
स्यात्तथापलायंतेकृतचाटवः कृतप्रीतियवचनाइवतंनिर्वासनंद्विपिनमीश्वराःहृष्टाःस्वयमागत्यसेवंते
इत्यर्थः॥४६॥नमुक्तिकारिकांधत्तेनिःशंकोयुक्तमानसः॥पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्नास्तेयथा
सुखं॥४७॥निःशंकोगतसंदेशयअतएवयुक्तमानसोनिश्चलमानसः ज्ञानीमुक्तिकारिकांयमनियमा
दिक्रियामाग्रहान्नधत्तेकिंतर्हिकर्तृत्वाध्यासरहितत्वात॥यथासुखमात्मसुखमनतिक्रम्यलोकदृष्ट्या

इह्राणादिक्रियां कुर्वन्नास्त इत्यर्थः ॥४७॥ वस्तुश्रवणमात्रेण शुद्धबुद्धिर्निराकुलः ॥ नैवाचारमनाचारमौदा
स्यं वा प्रपश्यति ॥४८॥ वस्तुनः निश्चिदात्मनः श्रवणमात्रेण ज्ञातया शुद्धबुद्धिरखंडात्मसाक्षात्कारस्ततो नि
राकुलः स्वस्वरूपस्थपुरुषः आचारक्रियानुष्ठानमनाचारमशुभं कर्म वा औदास्यं नैःकर्म्यं उभय
त्रापि ताटस्थं वा एतत्त्रयं अपि नैव प्रपश्यति ॥ आत्मस्थत्वादित्यर्थः ॥४८॥ यदा यत्कर्तुमायाति तदा तत्
कुरुते ऋजुः ॥ शुभं वाप्यशुभं वापि तस्य चेष्टा हि बालवत् ॥४९॥ यदा यच्छुभं नैःकर्म्यं वा अशुभं कर्म वा कर्तु
मायाति तल्लोकदृष्ट्या प्रारब्धवशात् कुरुते ऋजुराग्रहरहितः ॥ हि यतः कारणात्तस्य चेष्टा बालवत्प्रारब्धमात्रैव
न रागद्वेषाधीनः ॥४९॥ स्वातंत्र्यात्सुखमाप्नोति स्वातंत्र्याल्लभते परं ॥ स्वातंत्र्यान्निर्वृतिं गच्छेत्स्वातंत्र्यात्परमं पदं ॥
५०॥ स्वातंत्र्यात् रागद्वेषानधीनत्वात्सुखं मनःप्रसादमाप्नोति यतः स्वातंत्र्यात् परं ज्ञानं प्राप्नोति ॥ तथा स्वातंत्र्यान्नि
र्वृतिं नित्यसुखं गच्छेत्प्राप्नुयात् एवं स्वातंत्र्यात् परमं पदं स्वस्वरूपविश्रांतिं गच्छेत् ॥५०॥ अकर्तृत्वमभोक्तृत्वं स्वा ५२
त्मनो मन्यते यदा ॥ तदा क्षीणा भवंत्येव समस्ताश्चित्तवृत्तयः ॥५१॥ यदा स्वात्मानमकर्तृत्वमभोक्तृत्वं मन्

ते तदा समस्ताः चित्तवृत्तयः क्षीणा भवंत्येव अमुकं कर्माहं करिष्यामि अमुकं मे भोगं भवत्विलादि चित्तवृ
त्त्युदये तज्जन्यानामन्यासामपि चित्तवृत्तीनामनुदयादित्यर्थः ॥५१॥ उच्छृंखलाप्यकृतिका स्थितिर्धी
रस्य राजते ॥ न तु सस्पृहचित्तस्य शांतिर्मूढस्य कृत्रिमा ॥५२॥ धीरस्य वीतस्पृहस्य अकृत्रिका अकृत्रिमा उ
च्छृंखलापि शांतिरहिता अपि स्थितिः शोभते ॥ सस्पृहचित्तस्य मूढस्य तु कृत्रिमा शांतिर्न शोभत इत्यर्थः ॥५२॥
निरस्तकल्पनानां ज्ञानिनां तु भोगाणां त्यागोऽप्यनाग्रहे इत्याह ॥छ॥ विलसंति महाभोगैर्विशंति गिरि
गह्वरान् ॥ निरस्तकल्पना धीरा अबद्धा मुक्तबुद्धयः ॥५३॥ निरस्तकल्पना धीरा ज्ञानिनः कदाचित्प्रा
रब्धवशान्महाभोगैर्विलसंति क्रीडंति कदाचित्प्रारब्धवशाद्गिरिगह्वरान्पर्वतवनानि विशंति ॥ कीदृशा
अबद्धा आसक्तिरहिताः यतो मुक्तबुद्धयः कर्तृत्वाद्याभासरहितबुद्धय इत्यर्थः ॥५३॥ श्रोत्रियं देवतां
तीर्थमंगनां भूपतिं प्रियं ॥ दृष्ट्वा संपूज्य धीरस्य न कापि हृदि वासना ॥५४॥ धीरस्य ज्ञानिनः श्रोत्रियं
देवतां च तीर्थं पूजने सति हृदि कदापि वासना धर्मार्थकामवासना न जायते ॥ अंगनां भूपतिं प्रियं

शुश्रादिकं च दृष्ट्वा क्वापि काम्यपदार्थवासना न जायते॥ सर्वत्र समबुद्धित्वादित्यर्थः॥५४॥ भृत्यैः पुत्रैः
कलत्रैश्च दौहित्रैश्चापि गोत्रजैः॥ विहस्य धिक्कृतो योगी न याति विकृतिं मनाक्॥५५॥ भृत्यादिभिर्वि
हस्य उपहस्य हे धिक्कृत तिरस्कृतो योगी मनाक् किंचिदपि विकृतिं चित्तक्षोभं न याति रागद्वेषहेतोर्मोह
स्याभावादित्यर्थः॥५५॥ संतुष्टोपि न संतुष्टः खिन्नोपि न च खिद्यते॥ तस्याश्चर्यदशां तां तां तादृशा
एव जानते॥५६॥ लोकदृष्ट्या संतोषादियुक्तोपि वस्तुतः तद्रहितः तस्य ज्ञानिनस्तां ताम् आश्चर्यदशां तादृशा ए
व ज्ञानिन एव जानते॥५६॥ कर्तव्यतैव संसारो न तां पश्यंति सूरयः॥ शून्याकारा निराकारा निर्वि
कारा निरामयाः॥५७॥ कर्तव्यं नैव ममेदं कर्तव्यमिति कार्यसंकल्प एव संसारस्तद्धेतुत्वात् सूरयो
ज्ञानिनस्तां कर्तव्यतां न पश्यंति न संकल्पयंति॥ संकल्पमात्ररहितत्वात् कीदृशाः सूरयः॥ शून्ये
सर्वकार्यद्वये तथा वर्तमानघटाद्याकारे व्याकृते आकारः आभासो विद्यते येषां ते शून्याकाराः घटा ६३
द्याकारा निराकारा अत एव निर्विकाराः समा आत्मदर्शिन अत एव निरामयाः संकल्पोपद्रवरहिता

इत्यर्थः॥५७॥ अकुर्वन्नपि संक्षोभाद्व्यग्रः सर्वत्र मूढधीः॥ कुर्वन्नपि तु कृत्यानि कुशलो हि निराकुलः॥
५८॥ अकुर्वन्नपि मूढधीः सर्वत्र शून्याकारे निराकारे पुरुषे संक्षोभात् संकल्पाद्व्यग्रो भवति लोकदृष्ट्या
कृत्यानि कुर्वन्नपि कुशलो विद्वान् हि निश्चितं निराकुलो निश्चलचित्त आत्मारामत्वादेवेत्यर्थः॥
५८॥ सुखमास्ते सुखं शेते सुखमायाति याति च॥ सुखं वक्ति सुखं भुंक्ते व्यवहारेपि शांतधीः॥५९॥ ज्ञा
केन वशाद्व्यवहारे जायमाने शांतधीरात्मनिष्ठबुद्धिर्विद्वान्नात्मसुखमनतिक्रम्यैवास्ते उपविश
ति शेते आगच्छति गच्छति भुंक्ते सर्वेंद्रियव्यापारं करोतीत्यर्थः॥५९॥ ननु ज्ञानिनोपि व्यवहारेषु
कथं न खेद इत्यत आह॥६०॥ स्वभावाद्यस्य नैवार्तिर्लोकवद्व्यवहारिणः॥ महाहृद इवाक्षो
भ्यो गतक्लेशः सुशोभते॥६०॥ व्यवहारिणोपि यस्य ज्ञानिनः लोकवत् प्राकृतजनवत् आर्तिः खेदो
न जायते॥ कुतः स्वभावात् सादात्म्यतानंदस्य स्वभावात् स्वसामर्थ्यादित्यर्थः॥ स गतक्लेशो ज्ञानी
महाहृद इवाक्षोभ्यो निर्विकारः सुशोभते॥६०॥ निवृत्तिरपि मूढस्य प्रवृत्तिरुपजायते॥ प्रवृत्तिर

४४ पिधीरस्य निवृत्तिफलभागिनी॥६१॥ लोकदृष्ट्या प्रतीयमानापि मूढस्य बाह्येंद्रियव्यापाराणां निवृ
त्तिः प्रवृत्तिस्वरूपैव जायते॥ अहंकारादीनामनिवृत्तत्वात्॥ धीरस्य ज्ञानिनः लोकदृष्ट्या प्रारब्धवशा
त्प्रतीयमानापि प्रवृत्तिः निवृत्तिफलभागिनी मुक्तिपर्यवशायिनी स्यात् अहंकरोमीत्यभिमानाभावा
दित्यर्थः॥६१॥ परिग्रहेषु वैराग्यं प्रायो मूढस्य दृश्यते॥ देहे विगलिताशस्य क्व रागः क्व विरागता॥६२॥
मूढस्य देहाभिमानिनस्तत्संबंधतया परिगृहीतेषु परिग्रहेषु धनवेश्मादिषु प्रायो बाहुल्येन
वैराग्यं दृश्यते॥ देहे विगलिताशस्य तत्संबंधिनि पुत्रगृहादौ रागः स्यात् क्व च शत्रुव्याघ्रादौ वि
रागः स्यात् देहे रागविरागयोरभावेन तत्संबंधिषु रागविरागयोर्वक्तुमशक्यत्वादित्यर्थः॥६२॥ भा
वनाभावनासक्ता दृष्टिर्मूढस्य सर्वदा॥ भाव्यभावनया सा तु स्वस्थस्यादृष्टिरूपिणी॥६३॥ मूढ
स्य दृष्टिः सर्वदा भावनायां वासक्ता अहं भावनां करोमि यद्वाहमभावनां करोमीत्यहंकारा स्वस्थ ४४
स्यात्मनिष्ठस्य तु सा दृष्टिः भाव्यभावनया दृश्यचिंतया उपलक्षिताप्यदृष्टिरूपिणी दृश्यदर्शन

रहितरूपैव स्यात् अहंकरोमीत्यभिमानाभावादित्यर्थः॥६३॥ ननु दृश्यभावनया क्रियमाणेपि तस्य
दृष्टिः कथं दृश्यानालंबिनीत्याशंक्य निःकामत्वादित्या ह॥छ॥ सर्वारंभेषु निःकामो यश्चरेद्बाल
वन्मुनिः॥ न लेपस्तस्य शुद्धस्य क्रियमाणेपि कर्मणि॥६४॥ यो बालवन्निःकामः सन् प्रारब्धेन वशा
त्सर्वारंभेषु चरति प्रवर्त्तते तस्य शुद्धस्याहंकारमलवर्जितस्य कर्मणि क्रियमाणे न लेपो न वर्त्तते
३६ स्यादहंकाराभावादित्यर्थः॥६४॥ एवंविद्वानेव धन्य इत्याह॥छ॥ स एव धन्य आत्मज्ञः सर्वभावेषु
यः समः॥ पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्निस्तर्षमानसः॥६५॥ स एवात्मज्ञ धन्य एव नो
न्नः यः सर्वभावेषु समानबुद्धिः अत एवानिस्तर्षमानसः विरक्तचित्तो भवति किं कुर्वन् पश्यन्
शृण्वन् स्पृशन् जिघ्रन् अश्नन्नपि॥६५॥ तस्यैव धन्यत्वे युक्तिमाह॥छ॥ क्व संसारः क्व चाभासः
क्व साध्यं क्व च साधनं॥ आकाशस्येव धीरस्य निर्विकल्पस्य सर्वदा॥६६॥ धीरस्य ज्ञानिनः अत
एव सर्वदा विकल्परहितस्य संसारप्रपंचः क्व अत एव तत्प्रतिभासः क्व अत एव साध्यं स्वर्गा

४५ ऽदिकं क्व अत एव साधनं योगादिकं च क्व न क्वापि इत्यर्थः॥६६॥ स जयत्यर्थसंन्यासी पूर्णस्वरसविग्र
हः॥ अकृत्रिमोऽनवच्छिन्ने समाधिर्यस्य वर्त्तते॥६७॥ स अर्थसंन्यासी दृष्टादृष्टप्रयोजनशून्यो यतः
पूर्णस्वरसः पूर्णस्वभावो विग्रहः स्वरूपं यस्य स पूर्णस्वरसविग्रहो जयति॥ सर्वोत्कर्षेण वर्त्तते॥ सकः
यस्य अकृत्रिमः स्वाभाविक अनवच्छिन्ने पूर्णस्वरूपे समाधिरनवच्छिन्ने समाधिर्यस्य वर्त्तते जय
तीत्यर्थः॥६७॥ ज्ञाततत्त्वस्य तु सर्वं निराकांक्षत्वमेव मुख्यं लक्षणमित्याह॥६८॥ बहुनात्र किमुक्ते
न ज्ञाततत्त्वो महाशयः॥ भोगमोक्षनिराकांक्षी सदा सर्वत्र नीरसः॥६८॥ अत्र ज्ञानिनः बहुनोक्ते
न लक्षणेन किं प्रयोजनं यतो ज्ञाततत्त्वो महाशयः महाशयत्वं विवृणोति॥ भोगेति॥ भोगमोक्षयोः
फलयोर्निराकांक्षी अत एव सदा सर्वत्र भोगमोक्षसाधनेषु निरसः निरनुरागः॥६८॥ महदादि ज
गद्द्वैतं नाममात्रविजृम्भितं॥ विहाय शुद्धबोधस्य किं कृत्यमवशिष्यते॥६९॥ महदादीति महदहंका ४५
रपंचतन्मात्रापंचमहाभौतिकजगल्लक्षणं द्वैतं नाममात्रेणैव विजृम्भितं विभिन्नमिव भातं न तु

वास्तवं। वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः॥ अत एव तत्र कल्पनां विहाय
तस्य अत एव शुद्धबोधस्य स्वप्रकाशचिन्मात्रस्वरूपस्य किं कृत्यमवशिष्यते॥ सर्वदा सच्चिदानंदाऽधि
गमेनैव कृतकृत्यत्वादिति भावः॥६९॥ ननु तथापि अनर्थशांत्यर्थं प्रयत्नतः कर्त्तव्यः स्यात्॥७॥ भ्र
मभूतमिदं सर्वं किंचिन्नास्तीति निश्चयी॥ अलक्ष्यस्फुरणः शुद्धः स्वभावेनैव शाम्यति॥७०॥ अधि
ष्ठानसाक्षात्कारे सति इदं सर्वं भ्रमभूतं भ्रमेणैव कल्पितं॥ अत एवेदं किंचित्किमपि वास्तवं ना
स्तीति निश्चयी अलक्ष्यस्फुरणः चिन्मात्रप्रतिभासवान् एव शुद्धः स्वरूपसाक्षात्कारेण बाधितो
ऽस्तमलत्वात् स्वभावेनैव शांतो न तु शांत्यर्थं ज्ञानातिरिक्तमपेक्षमित्यर्थः॥७०॥ शुद्धस्फुरणरूपस्य
दृश्यभावमपश्यतः॥ क्व विधिः क्व च वैराग्यं क्व त्यागः क्व शमोपि वा॥७१॥ शुद्धस्फुरणरूपस्य स्वप्रकाश
चिद्रूपस्य अत एव दृष्टं दृश्यपदार्थमपश्यतः क्व कुत्र कर्मणि विधिः केषु वा विषयेषु वैराग्यं क्व के

ष्वपदार्थेषु त्यागः क्व केभ्यः पदार्थेभ्यः शमोपि वा कार्यः दृश्यपदार्थस्यैवास्फुरणादित्यर्थः॥७१॥स्फुरतोनं
तरूपेण प्रकृतिं च न पश्यतः॥क्व बंधः क्व च वा मोक्षः क्व हर्षः क्व विषादिता॥७२॥चिद्रूपेणैव प्रकाशमान
स्य बंधादिकं नास्तीत्यर्थः॥७२॥बुद्धिपर्यंतसंसारे मायामात्रं विवर्त्तते॥निर्ममो निरहंकारो निःकामः
शोभते बुधः॥७३॥बुद्धिः आत्मज्ञानमेव पर्यंतो नाशो यस्य तस्मिन्संसारे मायामात्रं मायासंवलितं चै
तन्यं विवर्त्तते अतात्विकं जगदाकारेण प्राप्नोति अतो बुद्धो विद्वान् तात्विके शरीरे निरहंकारस्तत्सं
बंधानि कलत्रादौ निर्ममः अत एव शोभते दीप्यते कामानामनभिमानत्वात्॥७३॥अक्षयं गतसंता
पमात्मानं पश्यतो मुनेः॥क्व विद्या च क्व वा विश्वं क्व देहोहं ममेति वा॥७४॥अक्षयं अविनाशिनं अत ए
व संतापरहितमात्मानं पश्यतो मुनेः क्व विद्या क्व शास्त्राणीत्यर्थः॥क्व च वा विश्वं क्व च देहः अहं ममेति
वा क्व आत्मातिरिक्तस्य विद्याविद्याविश्वादेः स्फुरणादित्यर्थः॥७४॥आत्मज्ञस्य द्वैतानर्थनिवृत्तिरित्यु ६६
क्तमनूद्य चित्तनिरोधादीन्यपि कर्माणि कुंजरशौचाभिप्रायेणाह॥छ॥निरोधादीनि कर्माणि ज

हाति जडधीर्यदि॥मनोरथान्प्रलापांश्च कर्तुमाप्नोति तत्क्षणात्॥७५॥यद्यपि जडधीः चित्तनि
रोधादीनि जहाति तर्हि तत्क्षणात्तस्मादेव क्षणादारभ्य मनोरथान्प्रलापान् जल्पनया सर्वव्यापा
रान्कर्तुमाप्नोति प्रवर्त्तते तथा च मूढस्य चित्तनिरोधादिकमकिंचित्कारमित्यर्थः॥७५॥मूढस्य आत्म
श्रवणमप्यनर्थकमित्याह॥छ॥मंदः श्रुत्वापि तद्वस्तु न जहाति विमूढतां॥निर्विकल्पो बहिर्यत्नादंत
र्विषयलालसः॥७६॥मंदो मूर्खः तदात्मवस्तु श्रुत्वापि मूढतां न जहाति॥मलिनचित्तस्य श्रवणाद
पि ज्ञानानुदयात् अत एव मूढ यत्नात् बाह्यदृष्ट्या निर्विकल्पो निर्व्यापारोपि अंतर्मनसि विषयलो
लोलुपो भवतीत्यर्थः॥७६॥ज्ञानी तु लोकदृष्ट्या कर्म कुर्वाणोपि अकर्त्तैवेत्याह॥छ॥ज्ञानाद्गलि
तकर्मा यो लोकदृष्ट्यापि कर्मकृत्॥नाप्नोत्यवसरं कर्तुं वक्तुमेव न किंचन॥७७॥यः ज्ञानाद्गलितक
र्मा गलिता क्रिया यस्मात्सः लोकदृष्ट्या कर्मकृदपि किंचन कर्तुं वक्तुमेवावसरं नाप्नोति कर्मावसरस्तु
दूरापास्त इति भावः॥७७॥विद्वांस्तु तमःप्रकाशादिकं न पश्यतीत्याह॥छ॥क्व तमः क्व प्रकाशो वा

हानं क्व च न किंचन ॥ निर्विकारस्य धीरस्य निरातंकस्य सर्वदा ॥ ७८ ॥ धीरस्य ज्ञानिन अत एव निर्विकार

६१ स्य निरस्तमोहादिविकारस्य तमः क्व तमसो भावे च तन्निरूपप्रकाशो वा क्व निरातंकस्य कालादि

भयशून्यस्य हानं क्व च न कुत्रेत्यर्थः ॥ अनुरागादिशून्यत्वात् किंचनाकिमपादानादिकर्मापि क्व च न

न कुत्रापीत्यर्थः ॥ ७८ ॥ ज्ञानीत्वनिर्वाच्यस्वभावइत्याह ॥ छ ॥ क्व धैर्यं क्व विवेकित्वं क्व निरातंकतापि वा

अनिर्वाच्यस्वभावस्य निःस्वभावस्य योगिनः ॥ ७९ ॥ योगिनः ज्ञानिनः अत एव निःस्वभावस्य अत एव

अनिर्वाच्यस्वभावस्य धैर्यं क्व विवेकित्वं च क्व निरातंकता निर्भयतापि क्वेत्यर्थः ॥ ७९ ॥ ज्ञानिनः [illegible] न तु

नरकमोक्ष दृष्ट्या तु स्वर्गादिकं किंचिदपि नास्तीत्याह ॥ छ ॥ न स्वर्गो नैव नरको जीवन्मुक्तिर्न चैव हि ॥ बहुनात्र किमु

४ क्तेन योगदृष्ट्या न किंचन ॥ ८० ॥ इति सुगमः श्लोकः ॥ ८० ॥ ज्ञानिनश्चित्तं तु प्रार्थनानुतापादिविकार

रहितत्वात् अमृतेनैव परमानंदेनैव पूरितमित्याह ॥ छ ॥ नैव प्रार्थयते लाभं नालाभेनानुशोचति ॥ धी ६१

रस्य शीतलं चित्तममृतेनैव पूरितं ॥ ८१ ॥ लाभं न प्रार्थयते अलाभेन सुवर्णाद्यलाभेन नानुशोचति अत

एव धीरस्य चित्तममृतेनैव परमानंदेनैव पूरितं सत् शीतलमाध्यात्मिकादितापरहितमित्यर्थः ॥ ८१ ॥ उक्त

प्रायमेवार्थं पुनर्भंगिविशेषेण वर्णयति ॥ ज्ञानदशायाः सर्वोत्कृष्टत्वख्यापनायाह ॥ छ ॥ न शांतं स्तौति निः

कामो न दुष्टमपि निंदति ॥ समदुःखसुखस्तृप्तः किंचित्कृत्यं न पश्यति ॥ ८२ ॥ निःकामोऽविद्याकामक

र्महीनो ज्ञानी शांतं शांत्यादिशुद्धसत्वगुणयुक्तं न स्तौति नापि दुष्टं निंदति तृप्तः सन् समदुःखसुखो भवति

निःकामत्वात् किंचित्कृत्यं न पश्यति ॥ ८२ ॥ धीरो न द्वेष्टि संसारमात्मानं न दिदृक्षति ॥ हर्षामर्षविनिर्मुक्तो न मृ

तो न च जीवति ॥ ८३ ॥ धीरो ज्ञानी संसारं न द्वेष्टि संसारादर्शित्वाद्बाधितानुसंधानात्तथात्मानं न दिदृक्षति ॥ अ

वाप्तसाक्षात्कारत्वात् ॥ अत एव हर्षामर्षविनिर्मुक्तस्तथा जीवन्मरणादिरहितः सदैकरूपत्वादित्यर्थः ॥ ८३ ॥

निःस्नेहः पुत्रदारादौ निःकामो विषयेषु च ॥ निश्चिंतः स्वशरीरेपि निराशः शोभते बुधः ॥ ८४ ॥ निराशो बुधः शो

भते दीप्यते कीदृशः पुत्रदारादौ निःस्नेहः प्रीतिरहितः विषयेषु निष्कामः भोगेच्छारहितः स्वशरीरेपि भोज

नादिचिंतारहितः ॥ ८४ ॥ तुष्टिः सर्वत्र धीरस्य यथापतितवर्तिनः ॥ स्वच्छंदं चरतो देशान्यत्रास्तमितशायि

४८ न:॥८५॥ धीरस्य ज्ञानिनः यथापतितेन यथाप्राप्तेन वर्त्तते तिष्ठति न वस्तुनि चतुष्टिरात्मतोऽपि एवं चरतस्तथा स्वच्छं
दं मननसेष्टितं शारब्धवशान्नानादेशान् विचरतः यत्र वने वा नगरे वा सूर्योऽस्तमितस्तत्रैव शायिनः शयनं कुर्व
त एवेत्यर्थः॥८५॥ पततूदेतु वा देहो नास्य चिंता महात्मनः॥ स्वभावभूमिविश्रांतिविस्मृताशेषसंसृतेः॥८६॥
देहः पततु म्रियतां वाथवा उदेतु जीवतु वा उभयथापि अस्य ज्ञानिनश्चिंता न भवति॥ कीदृशस्य स्वभावो नाम
निजात्मस्वरूपं स एव भूमिस्तत्र विश्रांत्या विस्मृतसमस्तसंसारस्य॥८६॥ अकिंचनः कामचारो निर्द्वंद्वश्छि
न्नसंशयः॥ असक्तः सर्वभावेषु केवलो रमते बुधः॥८७॥ केवलो निर्विकारो बुधो रमते कीदृश अकिंचनः॥
नास्ति किंचित्परिग्रहो यस्य स अकिंचन अत एव कामचारः विधिनिषेधाद्यकिंकरः स्वच्छंदचारी अत
एव निर्द्वंद्वः सुखदुःखादिशून्यः छिन्नसंशयः छिन्नसंशयशून्यः सर्वेषु भावेषु विषयेषु असक्तः आसंगशून्य
एवेत्यर्थः॥८७॥ निर्ममः शोभते धीरः समलोष्टाश्मकांचनः॥ सुभिन्नहृदयग्रंथिर्विनिर्धूतरजस्तमः॥ ४८
८८॥ धीरो ज्ञानी शोभते दीप्यते यतो निर्ममः॥ अत एव समलोष्टाश्मकांचनः ज्ञानबलेन सुभिन्नो हृ

दयग्रंथिरहंकारो यस्य स तथा विनिर्धूतरजस्तमसी यस्य सः॥८८॥ सर्वत्रानवधानस्य न किंचिद्वासनो
हृदि॥ मुक्तात्मनो वितृप्तस्य तुलना केन जायते॥८९॥ सर्वत्र सर्वेषु असक्त अनवधानस्य एकाग्रतारहित
स्य तथा न किंचिद्वासनः हृदि मुक्तात्मनः कर्तृत्वाद्यध्यासरहितात्मनः अत एवात्मानंदेन वितृप्तस्य
तस्य केन तुलना जायते ज्ञानिनव्यतिरिक्तस्य ईदृशस्याभावादित्यर्थः॥८९॥ अतुलनामेव विशेषेण वि
शदयति॥ छ॥ जानन्नपि न जानाति पश्यन्नपि न पश्यति॥ ब्रुवन्नपि न च ब्रूते कोऽन्यो निर्वासनादृते॥९०॥ ना५
निर्वासनाज्ज्ञानिनः ऋतेऽन्यः को लोके दृष्टा मनसा जानन्नपि वस्तुतो न जानाति तथा चक्षुषा पश्यन्न
पि वस्तुतो न पश्यति ब्रुवन्नपि न च ब्रूते कर्तृत्वाभिमानाभावादित्यर्थः॥९०॥ भिक्षुर्वा भूपतिर्वापि
यो निष्कामः स शोभते॥ भावेषु गलिता यस्य शोभनाशोभना मतिः॥९१॥ यस्य ज्ञानिनः उत्कृष्टेषु भावेषु
शोभना अपकृष्टेषु अशोभनत्वावगाहिनी मतिर्गलिता अत एव यो निष्कामः स भूपतिर्जनकादिर्वा भि
क्षुर्वा याज्ञवल्क्यादिर्वा शोभते एव भावेषु निर्विकल्पत्वाद्राज्यं तस्य न बंधायेत्यर्थः॥९१॥ क्व स्वाच्छंद्यं

अ०टी०

क संकोचः क्व वा तत्वविनिश्चयः॥ निर्व्याजार्जवभूतस्य चरितार्थस्य योगिनः॥ ९२॥ योगिनः निर्व्याजं नि
४९ ष्कपटं यदार्जवं ऋजुबुद्धिः तद्रूपस्यात्मनिष्ठत्वाच्चरितार्थस्य अनायत्याचाछंदं स्वेच्छाचारित्वं क्व तथा संकोच
प्रयत्नादिसंचरणं क्व तत्वविनिश्चयः क्व कर्तृत्वं वा क्व कर्तृध्यासाभावादतएव निर्व्याजं यदार्जवं वक्रबुध्याभा
वस्तद्रूपस्य॥ ९३॥ आत्मविश्रांतितृप्तेन निराशेन गतार्तिना॥ अंतर्यदनुभूयेत तत्कथं कस्य कथ्यते॥ ९
३॥ आत्मनि विश्रांत्या स्थित्या तृप्तेन अतएवाशारहितेन अतएव गतार्तिना गतदुःखेन ज्ञानिना यदंतः
करणेनुभूयेत तत्कथं कं प्रकारं धर्ममाश्रित्य कथ्यते प्रकृत्यैव धर्मस्याभावात्कस्य बाधकारिणः कथ्यते
वी४ नाहं शास्त्राधिकारिणमादित्यर्थः॥ ९३॥ सुप्तोपि न सुषुप्तौ च स्वप्नेपि शयितो न च॥ जागरेपि न जागर्ति धीर
स्तृप्तः पदे पदे॥ ९४॥ धीरः सुषुप्तौ न सुप्तः स्वप्नेपि शयितो न च जागरेपि न जा। गर्ति अवस्थावती या बुद्धिस्त
द्वियुक्तात्मज्ञानत्वात् अतएव इदमेवाभिप्रेत्याह॥ पदे पदे क्षणे क्षणे आवरत नित्यानंदानुभवतृप्तः॥ ४९
९४॥ ज्ञः सचिंतोपि निश्चिंतः सेंद्रियोपि निरिंद्रियः॥ सुबुद्धिरपि न बुद्धिः साहंकारोन हंकृतिः॥ ९५॥

४

न विक्षेपे न विक्षिप्तः न समाधौ न समाधिमान्॥ जाड्येपि न जडो धन्यः पांडित्येनापि पंडितः॥ ९७॥

ज्ञानी लोकदृष्ट्या चिंतादिसहितोपि वस्तुतस्तद्रहितः विविक्तात्मदर्शित्वादित्यर्थः॥ ९५॥ न सुखी न च
वा दुःखी न विरक्तो न रागवान्॥ न मुमुक्षुर्न वा मुक्तो न किंचिन्न च किंचन॥ ९६॥ लोकगत्या सुखीत्यादि
रूपोपि वस्तुतस्तद्रहितोंतःकरणाध्यासरहितत्वान्न विरक्तो विषयद्वेषाभावात्॥ न वा मुक्तः पूर्वमपि
बंधनाभावात् तथा किंच न सद्रेकरूपत्वात्तथा॥ कर्तृत्वाध्यासाभावाल्लोकदृष्ट्या जाड्ये प्रतीयमानेपि
न जडः स्वानुभवशालित्वाल्लोकदृष्ट्या पांडित्ये प्रतीयमानेपि न पंडितः पंडितोहमित्यभिमानाभा
वात्॥ ९७॥ मुक्तो यथास्थितिस्वस्थः कृतकर्तव्यनिर्वृतः॥ समः सर्वत्र वैतृष्ण्यान्न स्मरत्यकृतं कृतं॥ ९
८॥ मुक्तः प्रारब्धवशाद्यथाप्राप्तस्थितौ स्वस्थः चित्तः तथा कृते पूर्वं कृते कर्तव्ये च करिष्यमाणे कर्म
णि निर्वृतः॥ संतुष्टः अभिनिवेशोद्वेगशून्यः॥ अतएव च सर्वत्र समः वैतृष्ण्यादिदमकृतमिदं च कृतमिति न स्म
रति॥ ९८॥ न प्रीयते वंद्यमानो निंद्यमानो न कुप्यति॥ नैवोद्विजति मरणे जीवने नाभिनंदति॥ ९९॥ केनचि
त्स्मिन् वंद्यमानो न तुष्यति निंद्यमानो न कुप्यति॥ मरणे नोपस्थिते समति उद्वेगं न प्राप्नोति॥ आत्मनो नित्य

५० त्वोनुसंधानात्॥ अतएव जीवने रतिं नाभिनंदति न तुष्यति॥९९॥ न धावति जनाकीर्णं नारण्यमुपशांतधीः
यथा तथा यत्र तत्र सम एवावतिष्ठते॥१००॥ उपशांतधीः पुरुषः जनाकीर्णं प्रदेशं नानुधावति॥ नाप्यरण्यं सर्वत्र शं
तत्वात् यथा तथा जनसंमर्देन तदसंमर्देन प्रकारेण वा यत्र तत्र वने वा पत्तने वा सम एव स्वस्थचित्त एवावतिष्ठ
ते॥ आत्मसाक्षात्कारत्वात्॥१००॥ इति शांतिशतकं संपूर्णं॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां
शांतिशतकं नामाष्टादशमं प्रकरणं संपूर्णं॥१८॥ ॥साध्यमा घनरूपेण ज्ञाते ज्ञाने गुरोर्मुखात्॥ शिष्यस्त्वा
त्मनि विश्रांतिमष्टभिः प्राह सस्फुटं॥१॥ एवं तत्वज्ञानिनस्स्वभावभूतां शांतिं श्रुत्वा स्वकृतार्थत्वं तं गुरुं प
रितोषयितुमात्मविश्रांत्यष्टकं शिष्यः स्वयमाह॥ तत्वविज्ञानसंदंशमादाय हृदयोदरात्॥ नानाविध
परामर्शशल्योद्धारः कृतो मया॥१॥ हे गुरो मया भवतः सकाशात् तत्वविज्ञानोपदेशमादाय स्वहृदयोदरान्ना
नाविधपरामर्श एव यच्छल्यं तस्योद्धारः अपहारः कृतः॥१॥ न देवस्पृश्यति॥७॥ क्व धर्मः क्व च वा कामः ५०
क्व चार्थः क्व विवेकिता॥ क्व द्वैतं क्व च वाऽद्वैतं स्वमहिम्नि स्थितस्य मे॥२॥ धर्मार्थकामापि हृदयोदरा

न्निरस्ताः दायिमस्तु त्वादित्यर्थः स्वमहिम्नि स्थितस्य मे मम अविवेकिता क्व द्वैतं च क्व चिन्मात्रविश्रांतस्याविवेकानुप
योगात्॥ उत्तीर्णे तु परे पारे नौकायाः किं प्रयोजनमिति न्यायात् द्वैतस्य च ज्ञानबाधितत्वात्॥ अद्वैतस्य द्वैत
सापेक्षत्वेनास्वाभाविकत्वात्॥ विवेकादयोपि मम न संतीत्यर्थः॥२॥ क्व द्वैतमित्युक्तमेव विशेषतः प्रपंचयति
॥ क्व भूतं क्व भविष्यद्वा वर्तमानमपि क्व वा॥ क्व देशः क्व च वा नित्यं स्वमहिम्नि स्थितस्य मे॥३॥ क्व भेदा भूत
भविष्यवर्तमाना अपि न संतीत्यर्थः नित्यं स्वमहिम्नि स्थितस्य मे देशोपि नास्तीत्यर्थः॥३॥ क्व चात्मा क्व च वानात्मा
क्व शुभं क्वाशुभं तथा॥ क्व चिंता क्व च वाचिंता स्वमहिम्नि स्थितस्य मे॥४॥ अतति व्याप्नोतीति आत्मा सर्वं
व्याप्यमपेक्ष्य कथ्यते॥ स्वमहिम्नि स्थितस्य च मम आत्मादिकं नास्तीत्यर्थः॥४॥ क्व स्वप्नः क्व सुषुप्तिर्वा क्व च जा
गरणं तथा॥ क्व तुरीयं भयं वापि स्वमहिम्नि स्थितस्य मे॥५॥ स्वप्नादयो बुद्धेरेवावस्था मे न संति एवं त्रितयाभा
वे तन्निरूप्या तुरीयावस्थापि मम नास्ति तथा भयादयोप्यंतःकरणधर्मा मे न संतीत्यर्थः॥५॥ क्व दूरं क्व
समीपं वा बाह्यं क्वाभ्यंतरं क्व वा॥ क्व स्थूलं क्व च वा सूक्ष्मं स्वमहिम्नि स्थितस्य मे॥६॥ सर्वं संपूर्णस्य मम न

परि

५१ दूरसमीपादिकं नास्ति पूर्णदर्शिनो मम स्थूलसूक्ष्मदृष्टिरपि नास्तीत्यर्थः ॥६॥ क्व मृत्युर्जीवितं वा क्व क्व
लोकाः क्वास्य लौकिकं ॥ क्व लयः क्व समाधिर्वा स्वमहिम्नि स्थितस्य मे ॥७॥ कालत्रयेऽपि सद्रूपस्य मम जीव
तमरणे न स्तः पूर्णमात्रदर्शिनो मम भवको भूरादयो न संति। लौकिकं कार्यं अपि नास्ति पूर्णस्य मम लयेपि ल
यः क्व समाधिश्च क्व ॥७॥ अलं त्रिवर्गकथया योगस्य कथयाप्यलं ॥ अलं विज्ञानकथया विश्रांतस्य ममात्मनि
॥८॥ धर्मार्थकामकथया योगाभ्यासकथया विज्ञानकथया चालं ॥ आत्मविश्रांतस्य मम एतैः प्रयोज
नाभावादित्यर्थः ॥८॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामात्मविश्रांत्यष्टकं शिष्यप्रोक्तं
संपूर्णं ॥१९॥ आत्मविश्रांत्या निर्व्यक्तिः स्वभावो मुक्तिशालिनी ॥ जीवन्मुक्तिदशां शिष्यश्चतुर्द
शभिरब्रवीत् ॥१॥ प्राग्युक्तात्मविश्रांते फलीभूतां विदुषस्त्वभावभूतां जीवन्मुक्तिदशां शिष्यश्चतुर्दश
श्लोकैर्निरूपयति ॥छ॥ क्व भूतानि क्व देहो वा क्वेंद्रियाणि क्व वा मनः ॥ क्व शून्यं क्व च नैराश्यं मत्स्वरूपे
निरंजने ॥१॥ निरंजने सर्वोपाधिमलशून्ये मत्स्वरूपे मनांसि क्वतादात्म्यं शून्यमस्ति नेत्यादि ॥ क्व शून्य ५१

अ०टी०

मिति ॥ नहि सदास्थानमात्मनि शून्यं संभवतीत्यर्थः ॥ मयि नैराश्यमपि स्वाभाविकं न आशानिरूपत्वादित्यर्थः ॥१॥ क्व
शास्त्रं क्वात्मविज्ञानं क्व वा निर्विषयं मनः ॥ क्व तृप्तिः क्व वितृष्णत्वं गतद्वंद्वस्य मे सदा ॥२॥ सदा गतद्वंद्वस्य मे मम शास्त्र
तज्जन्यविज्ञानं च क्व आत्मविश्रांत्या सदसद्गलितप्रायत्वात् ॥ निर्विषयं मनोऽपि तस्यापि गलितप्रायत्वात् अ
त एव तृप्तिरपि तथा तृप्तिसाध्या वितृष्णापि चित्तस्यैव गलितप्रायत्वादित्यर्थः ॥२॥ क्व विद्या क्व च वावि
द्या क्वाहं क्वेदं मम क्व वा ॥ क्व बंधः क्व च वा मोक्षः स्वरूपस्य क्व रूपता ॥३॥ मयि क्व विद्याद्यहंकारधर्मोऽइदं वाह्यवस्तुज्ञा
नं क्व ज्ञाने क्व मम संबंधः क्वाहमित्यस्य संबंधिनो भावात् ॥ तथा बंधमोक्षावपि धर्मौ क्व अत्र हेतुमाह ॥ स्वरूपस्ये
ति ॥ निर्विशेषस्वरूपस्य मम रूपता धर्मवत्ता क्व तथा च निर्धर्मके मयि ना विद्यादयोऽपि धर्माः संतीति फलिता
र्थः ॥ क्व प्रारब्धानि कर्माणि जीवन्मुक्तिरपि क्व वा ॥ क्व तद्विदेहकैवल्यं निर्विशेषस्य सर्वदा ॥४॥ प्रारब्धानि
कर्माणि तथा जीवन्मुक्तिरूपा विदेहकैवल्यमेते धर्मा मदा निर्विशेषस्य मे न संतीत्यर्थः ॥४॥ क्व कर्ता क्व च
वा भोक्ता निःक्रियं स्फुरणं क्व वा ॥ क्वापरोक्षं फलं वा क्व निःस्वभावस्य मे सदा ॥५॥ सदा निःस्वभावस्य

५२ मेकर्तृत्वभोक्तृत्वान्निःक्रियस्फुरणान्नि क्व अत एवापरोक्षं वृत्तिरूपं च ज्ञानं क्व फलं विषयावच्छिन्नं यत्स्फुरणं चैत
न्यं क्वेत्यर्थः॥५॥ क्व लोकः क्व मुमुक्षुर्वा क्व योगी ज्ञानवान् क्व वा॥ क्व बंधः क्व च वा मुक्तः स्वस्वरूपेऽहमद्वये॥६॥
अहमिति एवरूपे ऽद्वये अहमद्वये आत्माद्वैते॥ स्वरूपे सति लोकः क्व मुमुक्षुः क्व योगी क्व ज्ञानवानपि क्व मु
क्तो बद्धः क्वेत्यर्थः॥६॥ क्व सृष्टिः क्व च संहारः क्व साध्यं क्व च साधनं॥ क्व साधकः क्व सिद्धिर्वा स्वस्वरूपेऽहमद्वये॥
७॥ अहमद्वये आत्माद्वैते स्वस्वरूपे सति सृष्टिसंहारौ साध्यसाधने साधकसिद्धिर्वा क्व॥७॥ क्व प्रमाता प्रमा
णं वा क्व प्रमेयं क्व च प्रमा॥ क्व किंचित् क्व न किंचिद्वा सर्वदा विमलस्य मे॥८॥ सर्वदा विमलस्योपाधिसंबं
धमलशून्यस्य मे प्रमाणप्रमेयप्रमासंबंधः क्व मम किंचित्सामान्यतोऽन्यत्पदार्थमात्रं क्व न किंचिद्वा क्व प २४
दार्थाभावोऽपि मम क्व सर्वथा संबंधशून्यत्वादित्यर्थः॥८॥ क्व विक्षेपः क्व चैकाग्र्यं क्व निर्बोधः क्व मूढता॥ क्व
सुखं क्व च वा दुःखं निर्विमर्शस्य मे सदा॥ क्व हर्षः क्व विषादो वा सर्वदा निःक्रियस्य मे॥९॥ सर्वदा निःक्रि
यस्य मे विक्षेपादिका क्रिया क्वेत्यर्थः॥९॥ क्व चैष व्यवहारो वा क्व च सा परमार्थता॥ क्व सुखं क्व च वा दुः ५२

२३

खं निर्विमर्शस्य मे सदा॥१०॥ सदा निर्विमर्शस्य विशेषज्ञानवृत्तिशून्यस्य व्यवहारः व्यावहारिकपदार्थज्ञानं क्व
परमार्थता ज्ञानं क्व सुखदुःखादिकमपि क्व॥१०॥ क्व माया क्व च संसारः क्व प्रीतिर्विरतिः क्व वा॥ क्व जीवः क्व
च तद्ब्रह्म सर्वदा विमलस्य मे॥११॥ सर्वदा विमलस्य उपाधिमलशून्यस्य मम माया मे आरोपिता विरतिर्वा वै
राग्यं क्व जीवभावो ब्रह्मभावश्च क्व कार्योपाधेरभावे जीवत्वस्य वक्तुमशक्यत्वात् व्याप्यवस्तुनामभावे ब्रह्म
त्वस्य च वक्तुमशक्यत्वादित्यर्थः॥११॥ क्व प्रवृत्तिर्निवृत्तिर्वा क्व मुक्तिः क्व च बंधनं॥ कूटस्थनिर्विभागस्य
स्वस्थस्य मम सर्वदा॥१२॥ कूटस्थनिःक्रियस्य तथा निर्विभागस्य भेदरहितस्य सर्वदा स्वस्थस्य मम प्रवृ
त्तिनिवृत्तिः क्व मुक्तिर्बंधने च क्वेत्यर्थः॥१२॥ क्वोपदेशः क्व वा शास्त्रं क्व शिष्यः क्व च वा गुरुः॥ क्व चास्ति पुरुषा
र्थो वा निरुपाधेः शिवस्य मे॥१३॥ निरुपाधेरुपाधिशून्यस्य तथा शिवस्य नित्यानंदस्वरूपस्य उपदेशनक्रिया क्व
उपदेशकं शास्त्रं च क्व मायाया उपाधेरभावेन तत्कृतोपदेशस्य चाभावात् अत एव शिष्यश्च क्व स्वयं शिवरूपस्य
च पुरुषार्थो वा क्व चास्ति॥१३॥ जीवन्मुक्तदशामुपसंहरति॥ ०॥ क्व चास्ति क्व च वा नास्ति क्वास्ति चैकं क्व च द्व

५३ ये॥ वक्तुः नात्र किमुक्ते नाकिंचिन्नातिष्ठते मम॥ १४॥ मम अस्तीति न स्फुरति॥ असत्वापेक्षत्वात्सत्वस्य तथा ना
स्तीत्यपि न स्फुरति॥ सत्वापेक्षत्वान्नास्तित्वस्य। अत एव मिथः सापेक्षत्वाच्चैकत्वाद्वित्वेपि मम मनस्तः चत्वेकेव
क्तिभेदेन निषेधस्य कल्पकोटिभिरपि वक्तुमशक्यत्वात् मामान्यत आह॥ वक्तुः नात्रुक्ते नाकिंप्रयोजनं न मनश्चेद
करूपस्याकिं। चदपि नोऽस्ति इष्ट तेन प्रकाशात इत्यर्थः॥ १४॥ इति श्री महिम्नेश्वरविरचितायामष्टावक्रटीकायां
शिष्यप्रोक्तं जीवन्मुक्तचतुर्दशकं नाम विंशत्युपदेशः॥ २०॥ विनयेवुद्धसौकर्यं उद्दिष्टग्रंथसत्त्वयं॥ श्लोकसं
ख्यापुरस्कृत्य प्राह्यानुक्रमणीस्फुटं॥ ॥ दशाष्टचोपदेशेस्युः श्लोकाश्च पंचविंशति॥ सत्यात्मानुभवोल्ला
से उपदेशे चतुर्दश॥ १॥ षट्दशषोडशश्लोका गुरुणोपदेशेस्युः स्मृति॥ प्रथमेप्रकरणे॥ पंचविंशति श्लोकाः शि
ष्योक्तानुभवोल्लासे द्वितीयप्रकरणेस्युः॥ चतुर्दशश्लोकाः पुनर्गुरुणाक्षेपमुद्रयोक्तोपदेशाख्ये तृतीयप्रकर
णेस्युः॥ ॥ षट् उल्लासे लये चैवोपदेशे चतुष्कत्युः॥ पंचकं स्यादनुभवे बंधमोक्षे चतुष्ककं॥ २॥ षट्श्लोकाः शिष्यो
क्तानुभवोल्लासे चतुर्थप्रकरणेस्युश्चत्वारः श्लोका गुरुप्रोक्ते लयाख्ये पंचमप्रकरणेस्युः॥ पुनश्चत्वारः श्लो ५३

का गुरुप्रोक्ते प्रतिवादिसिद्धलयाभेदोपदेशाख्ये षष्ठे प्रकरणेस्युः श्लोकानां पंचकं शिष्यप्रोक्तेनुभवाख्ये
सप्तमे प्रकरणे स्यात्॥ श्लोकानां चतुष्कं गुरुप्रोक्ते बंधमोक्षेष्टमे प्रकरणे स्यात्॥ २॥ निर्वेदोपशमो ज्ञाने
वमेवाष्टकं भवेत्॥ यथासुखं सप्तकं च शांतौ स्याद्दशकं मतं॥ ३॥ श्लोकाष्टकं गुरुप्रोक्ते निर्वेदाख्ये नवमे प्र
करणे स्यात् गुरुप्रोक्तमुपशमाष्टकं नाम दशमं प्रकरणं गुरुप्रोक्तं ज्ञानाष्टकं नाम एकादशं प्रकरणं शिष्य
प्रोक्तमेवाष्टकं नाम द्वादशमं प्रकरणं शिष्यप्रोक्तं यथासुखसप्तकं नाम त्रयोदशं प्रकरणं शिष्यप्रोक्तं शां
ति चतुष्कं नाम चतुर्दशं प्रकरणं॥ ३॥ तत्वोपदेशे विंशाच्च दश ज्ञानोपदेशके॥ तत्वस्वरूपे विंशच्च शमे चश
तकं भवेत्॥ ४॥ विंशति श्लोका गुरुप्रोक्ते तत्वोपदेशाख्ये पंचदशे प्रकरणे स्युः॥ विंशति श्लोकाः गुरुप्रोक्त
तत्वस्वरूपोपदेशाख्ये षोडश प्रकरणे स्युः गुरुप्रोक्तं शमशतकं नामाष्टादशमं प्रकरणं॥ ६॥ अष्टकं चा
त्मविश्रांतौ जीवन्मुक्तौ चतुर्दश॥ षट्संख्याक्रमविज्ञाने ग्रंथैकात्म्यमतः परं॥ ५॥ शिष्यप्रोक्तमात्मविश्रां
तष्टकं नाम एकोनविंशतिप्रकरणं॥ शिष्यप्रोक्तं जीवन्मुक्तचतुर्दशकं नाम विंशतितमं प्रकरणं॥ गुरु

५४ श्लोकसंख्याक्रमकथनंनामैकविंशतितमप्रकरणं॥५॥ विंशत्येकमितैः षड्भिः श्लोकैरात्माग्निमध्यगैः
अवधूतानुभूतेश्च श्लोकाः संख्याक्रमा अमी॥६॥ अतः परं विंशत्येकमितैः खंडैः केग्रंथेकात्म्यसंख्या
ग्रंथषंडानां चैवैकात्म्यमसुहृतया विंशत्येकमितैः॥ इति अष्टावक्रसंख्याक्रमं विंशत्येको कियद्भिः खं
डैः॥ विंशत्येकमितैः एकविंशतिखंडैरित्यर्थः कियद्भिः श्लोकैरात्माग्निमध्यगैः। जीवात्मपरमात्म
भेदाभिन्नात्मा वै आग्निस्त्रयः मध्यखंचमध्येश्च न्यमंकनोवामतोगतिः अंतैर्दोमध्येखमादौत्रयं॥॥
३०२॥ द्वाधिकेत्रिंशतश्लोकैरित्यर्थः॥ श्लोकसंख्यामुपसंहरति॥ अवधूतेति॥ अवधूतानुभू
तेः रूपोयंग्रंथस्तस्य संख्याक्रमो विद्यते येषु ते संख्याक्रमा ईदृशाः श्लोका अमी कथिता इत्यर्थः
६॥ इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां संख्याक्रमादिमाख्यानं समाप्तं॥ संपू
र्णोयं अष्टावक्रग्रंथः॥ संवत् १७ ७०॥ वर्षे वैशाखमासे शुक्लपक्षे सप्तम्यां चंद्रवासरे॥ श्री ५४
लिखितं साधुसहजराम॥ स्वात्मपठनार्थं॥ शुभमस्तु लिखितं भुजनगरमध्ये॥ श्रीराम॥